Sanskrit

Prak-Sastri 2nd Year
Course/Paper.8

PART - A

# लघुजातकम्

# *Laghujātakam*

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# लघुजातकम्

**'भट्टोत्पल-संस्कृतोपेतम्'**

**-----**

## राशि-प्रभेदाध्यायः- १

**मङ्गलाचरणम्**

**यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोऽपि ।**
**कुरुतेऽञ्जलिं त्रिनेत्रः स जयति धाम्नां निधिः सूर्यटः।।१।।**

टीकाकारकृत मङ्गलाचरणम्

येनोत्पाट्य समूलमन्दरगिरिश्छत्रीकृतो गोकुले
राहुर्येन महाबली सुररिपुः कायार्द्धशीर्षीकृतः।
कृत्वा त्रीणि पदानि येन वसुधां बद्धो बलीर्लीलया
स मां पातु युगे युगे युगपतिस्त्रैलोक्य नाथो हरिः।।

सतामयमाचारो यच्छास्त्रप्रारम्भेऽभिमतदेवातानमस्कारं कुर्वन्ति। तदयमावन्तिकाचार्यवराहमिहरोऽर्क-लब्धवरप्रसादो ज्योतिःशास्त्रसङ्ग्रहं कृत्वा तदेव भीरूणां कृते सङ्क्षिप्तगणितसङ्ग्रहं कृत्वा होराशास्त्रं सङ्क्षिप्तं वक्ष्यमाणोऽशेषविघ्नोपशमायाभिमतसूर्यस्यादौ प्रणाममाह-स सूर्य आदित्यो जयति सर्वोत्कर्षेण वर्तते। कथम्भूतो धाम्नां निधिः। यस्योदयकालेऽस्तकाले च त्रिनेत्रो महेशः अञ्जलिं कुरुते नमस्कारं करोतीत्यर्थः। कीदृशः सुरमुकुटनिघृष्टचरणकमलो देवचूडामणि- निघृष्टपादपद्म इत्यर्थः। यतः सर्वे देवा भगवतो नारायणस्य महादेवस्य पादवन्दनं कुर्वन्ति। अपि-शब्दाद्यस्य महादेवोऽपि अञ्जलिं करोति तस्य सेन्द्राः सुराः महर्षयश्च वन्दनं कुर्वन्ति।। २।।

**ग्रन्थारम्भप्रयोजनम्-**

**होराशास्त्रं वृत्तैर्मया निबद्धं निरीक्ष्य शास्त्राणि।**
**यत्तस्याप्यार्याभिः सारमहं सम्प्रवक्ष्यामि।। २।।**

होराशास्त्रं वक्ष्यामीत्याह। होराशास्त्रं जातकं मया वृत्तैर्नानाविधैर्निबद्धं रचितम्। किं कृत्वा शास्त्राण्यन्यानि निरीक्ष्य विलोक्य यत्तस्य सारमार्याभिः सम्प्रवक्ष्यामि कथयिष्यामीत्यर्थः।। २।।

**ग्रन्थप्रशंसा -**

**यदुपचितमन्यजन्मनि शुभाऽशुभं तस्य कर्मणः पक्तिम्।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।। ३।।**

शास्त्रोपयोगित्वमाह। प्राणिनां यदन्यजन्मनि शुभमशुभं वा कर्मार्जितं सञ्चितं तस्य कर्मणः प्राप्तिमेतच्छास्त्रं व्यञ्जयति प्रकटीकरोतीत्यर्थः। यस्मिन् काले शुभफलं यस्मिश्चातोऽशुभफलमिति। क इव दीप इव। यथा दीपस्तमसि अन्धकारे द्रव्याणि विद्यमानानि व्यञ्जयति व्यवहारार्थम्।। ३।।

**कालपुरुषस्य अङ्गानि -**

**शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसंज्ञानि।**
**ऊरू जानू जङ्घे चरणाविति राशयोऽजाद्याः।। ४।।**
**कालनरस्यावयवान् पुरुषाणां चिन्तयेत्प्रसवकाले।**
**सदसद्ग्रहसंयोगात् पुष्टाः सोपद्रवास्ते च।। ५।।**

कालपुरुषस्य मेषादिराशिपूर्वकमङ्गविभागमाह। अजाद्या राशयः कालस्याङ्गानि। राशय इति फलितोऽर्थः। अस्य कालपुरुषस्य मेषःशिरः, वृषो मुखं, मिथुनं बाहू,कर्कटो हृदयं, सिंह उदरं, कन्या कटिः, तुला वस्तिर्नाभेदधोभागः, वृश्चिको गुह्यं, धनुरूरुयुग्मं, मकरो जानुयुगलं, कुम्भो जङ्घे, मीनश्चरणौ। प्रयोजनम्- जन्मकाले पुरुषादिराशिषु शुभग्रहाक्रान्तेषु मनुष्याणां शीर्षादिकानामारोग्यता पापाक्रान्तेषु रोगित्वं संग्रामादिप्रविष्टस्य व्रणादिज्ञानम्।। ४-५।।

**राशीनां वर्णाः**

**अरुणसितहरितपाटलपाण्डुविचित्राः सितेतरपिशङ्गौ।**
**पिङ्गलकर्बुरबभ्रुकमलिना रुचयो यथासङ्ख्यम्।। ६।।**

व्याधितस्य पीडाज्ञानाय तिलकादिचिह्नज्ञानाय च राशिवर्णज्ञानमाह। अजाद्या इत्यनुवर्तते। अजादयो राशयो वर्णयुता भवन्ति। तत्र मेषोऽरुण ईषद्रक्तः, वृषः श्वेतः, मिथुनं हरितः शुकाभः, कर्कटः पाटलः ईषच्छ्वेतरक्तः, सिंहः पाण्डुधूम्राभः ईषच्छुक्लः, कन्याराशिर्विचित्रो नानावर्णः, तुला सितेतरः कृष्णः, वृश्चिकः पिशङ्गः सुवर्णवर्णः, धन्वी पिङ्गल ईषत्कपिलः, मकरः कर्बुरः शुक्लकपिलो मिश्रवर्णः, कुम्भो बभ्रुः कपिलः, मीनो मलिनो मत्स्यवर्णः। एतासां राशीनां रुचयो वर्णाः। प्रयोजनं हृतनष्टादिषु द्रव्यवर्णज्ञानम्।।६।।

**राशीनां पु.स्त्री.संज्ञा दिशश्च -**

**पुंस्त्री-क्रूराऽक्रूरौ चर-स्थिर-द्विस्वभावसंज्ञाश्च।**
**अजवृषमिथुनकुलीराः पञ्चमनवमैः सहैन्द्र्याद्याः।। ७।।**

राशिसंज्ञादिदिग्विभागं चाह। पुंस्त्रीति-मेषः पुमान्, वृषः स्त्री, मिथुनं पुमान्, कर्कटः स्त्री एवं सर्वत्र। तथा क्रूराऽक्रूरौ मेषः क्रूरः वृषोऽक्रूरः सौम्यः एवं सर्वत्र। चरस्थिरद्विस्वभावसंज्ञाश्चेति। ततो मेषश्चरः, वृषः स्थिरः मिथुनं द्विस्वभावः एवं सर्वत्र कर्कटादिषु। प्रयोजनं पुरुषशीलज्ञानादि। अजवृषमिथुनकुलीरा इति। अजो मेषस्तस्य पञ्चमनवमाभ्यां सह पूर्वदिग्वृषस्य स्वपञ्चमनवमाभ्यां सह दक्षिणा दिक्। मिथुनस्य स्वपञ्चमनवमाभ्यां सह पश्चिमा दिक्। कुलीरः कर्कटस्तस्य पञ्चमनवमाभ्यां सहोत्तरा दिक्। प्रयोजनं तु चोरादेर्दिग्गमनादिज्ञानम्। ७।।

**मेषादि राशीनां नवांशानां च स्वामिनः -**

**कुजशुक्रज्ञेन्द्वर्कज्ञशुक्रकुजजीवसौरियमगुरवः**
**भेशा नवांशकानामजमकरतुलाकुलीराद्याः।। ८।।**

राश्यंशाऽधिपानाह। कुजादयो मेषादीनामधिपः। तत्र मेषस्य भौमोऽधिपत्तिः, वृषस्य शुक्रः, मिथुनस्य

बुधः, कर्कस्य चन्द्रः, सिंहस्यादित्यः, कन्याया बुधः, तुलायाः शुक्रः, वृश्चिकस्य भौमः, धन्विनो जीवः, मकरस्य मन्दः, कुम्भस्य शनिः, मीनस्य बृहस्पतिः। तथा नवांशकानामजमकरतुलाकुलीराद्या इति येषां नवांशकानां ते अजमकरकुलीराद्याः। मेषस्य मेषाद्या नवांशा धन्वन्ताः, वृषस्य मकराद्या कन्यान्ताः, मिथुनस्य तुलाद्या मिथुनान्ताः, कर्कटस्य कर्कटाद्या मीनान्ताः, मेषवत् सिंहधन्विनोः,वृषवत् कन्यामकरयोः, मिथुनवत्तुलाकुम्भयोः कर्कटवद्वृश्चिकमीनयोर्नवांशकानां राश्यधिपा एव अधिपतयो ज्ञेयाः ।। ८।।

**होरा-द्रेष्काण-द्वादशांशस्वामिनः -**

**स्वगृहाद्द्वादशभागाः द्रेष्काणाः प्रथमपञ्चनवपानाम्।**
**होरे विषमेऽर्केन्दोः समराशौ चन्द्रतीक्ष्णांशोः।। ९।।**

द्वादशभागद्रेष्काणहोराधिपतिज्ञानमाह। स्वगृहात् आरभ्य द्वादशभागाः २/३० गणनीयाः। मेषस्य मेषाद्या मीनान्ताः, वृषस्य वृषभाद्या मेषान्ताः, एवं सर्वत्र। द्वादशांशकानां राश्यधिपा एवाऽधिपतयः। द्रेष्काणाः प्रथमपञ्चनवपानामिति। द्रेष्काणो राशित्रिभागः। एवं यथक्रमं प्रथमपञ्चनवपानां सम्बन्धिनो भवन्ति। तथा मेषस्य प्रथमोऽङ्गारकः तस्य सम्बन्धी, द्वितीयः पञ्चमस्याधिपस्यार्कस्य सम्बन्धी, तृतीयो नवमाधिपस्य जीवस्य सम्बन्धी एवं वृषादीनामपि। होरे विषमे इति। होरा राश्यर्धं १४ तत्र विषमराशीनां मेषमिथुनसिंहादीनां प्रथमहोरादित्यस्य द्वितीयहोरा चन्द्रमसः। समराशीनां वृषकर्कटकन्यादीनां प्रथमा चन्द्रमसः, द्वितीयार्कस्य ।। ६।।

**त्रिंशांशपतयः -**

**कुजयमजीवज्ञसिताः पञ्चेन्द्रियवसुमुनीन्द्रियांशानाम्।**
**विषमेषु समर्क्षेषूत्क्रमेण त्रिंशांशपाः कल्प्याः।। १०।।**

त्रिंशांशाधिपानाह। विषमराशिषु यथाक्रमेण कुजादीनां पञ्चादयो भागाः त्रिंशांशकाः कल्प्याः। तत्रादावेवाङ्गारकस्य पञ्च, ततः परं मन्दस्य पञ्च, ततो जीवस्याष्टौ, ततः परं बुधस्य सप्त, ततः शुक्रस्य पञ्च। एवं समराशिषूत्क्रमेण। यथा प्रथमाः पञ्च शुक्रस्य, ततः सप्त बुधस्य, ततोऽष्टौ जीवस्य, ततः पञ्च सौरस्य, ततः पञ्च भौमस्य।।१०।।

**राशीनां दिग्बलं कालबलं द्विपदादिसंज्ञाः च -**

**नृचतुष्पदकीटाप्या बलिनः प्राग्दक्षिणापरोत्तरगाः।**
**सन्ध्याद्युरात्रिबलिनः कीटा नृचतुष्पदाश्चैवम्।।११।।**
**मेषवृषधन्विसिंहाश्चतुष्पदा मकरपूर्वभागश्च।**
**कीटः कर्कटराशिः सरीसृपो वृश्चिकः कथितः।।१२।।**
**मकरस्य पश्चिमार्धं ज्ञेयो मीनश्च जलचरः ख्यातः।**
**मिथुनतुलाघटकन्या द्विपदाख्या धन्विपूर्वभागश्च।।१३।।**

राशीनां दिक्कालबलमाह। नृराशयो मिथुनकन्यातुलाकुम्भधन्विपूर्वार्द्धमेते पूर्वस्था बलिनः। लग्नगता इत्यर्थः। चतुष्पदा मेषवृषसिंहधन्विपूर्वा मकरपूर्वार्द्धे एते दक्षिणस्था बलिनो दशमस्थानगता इत्यर्थः।

कीटो वृश्चिकः स पश्चिमस्थो बली सप्तमस्थ इत्यर्थः। कर्कटमकरपरार्धमीना आप्याः एते चोत्तरस्था बलिनश्चतुर्थस्थानगता इत्यर्थः। सन्ध्याद्यरात्रिबलिन इति। अत्र जलराशयोऽपि कीटग्रहणेन गृह्यन्ते। एवं कीटः सन्ध्याकाले बली, नरराशयो दिवाकाले बलिनश्चतुष्पदा रात्रौ बलिनः।।११ -१३।।

**राशिबलज्ञानम् -**

**अधिपयुतो दृष्टो वा बुधजीवयुतेक्षितश्च यो राशिः।**
**स भवति बलवान्न यदा युक्तो दृष्टोऽपि वा शेषैः।।१४।।**

अथ राशिबलज्ञानार्थमाह। अधिपयुतः स्व-स्वामिना युतो दृष्टो वा राशिर्बलवानेव। बुधजीवयोरन्यतमेन युक्तो दृष्टो वा बलवानेव। यदाऽन्यैर्ग्रहैरयुतो नाऽपि वीक्षितः। अनुक्तदृष्टो युक्तो उक्तानुक्तैर्दृष्टो राशिर्मध्यबलो भवति। स्वस्वामिना बुधजीववर्ज्यमन्यैर्युतर्दृष्टो बलहीन एव।।१४।।

**लग्नादिभाव संज्ञाः -**

**तनुधनसहजसुहृत्सुतरिपुजायामृत्युधर्मकर्मायाः।**
**व्यय इति लग्नाद्भावाश्चतुरस्राख्येऽष्टमचतुर्थे ।। १५।।**

लग्नादीनां तन्वादिभावाश्रयत्वं व्यवहारार्थमाह। लग्नादारभ्यामी तन्वादयो भावाः। तत्र लग्नं प्रथमं पुरुषस्य शरीरं द्वितीयं धनस्थानं तृतीयं सहजं चतुर्थं सुहृत् भ्रातृमित्रसंज्ञं वा पञ्चमं सुतः षष्ठं शत्रुः सप्तमं जाया भार्या वा अष्टमं मृत्युः नवमं धर्मः दशमं कर्म एकादशं आयः द्वादशं व्ययः। प्रयोजनं लग्नादीनां यथोक्तभावानां शुभपापग्रहसंयोगात्सम्पत्तिविपत्ती चिन्तनीय इति। चतुरस्राख्येऽष्टमचतुर्थे लग्नादष्टमस्थानस्य चतुर्थस्थानस्य चतुरस्र इत्याख्या।।१५।।

**विशेष संज्ञाः -**

**पातालहिबुकवेश्मसुखबन्धुसंज्ञाश्चतुर्थभावस्य।**
**नव-पञ्चमे त्रिकोणे नवमर्क्षं त्रित्रिकोणं च ।। १५।।**

चतुर्थनवमपञ्चमानां संज्ञान्तरमाह। लग्नाच्चतुर्थ भवनस्य पातालसंज्ञा सुखसंज्ञा वेश्मसंज्ञा हिबुकसंज्ञा बन्धुसंज्ञा च। तथा च नवमस्य पञ्चमस्य च त्रिकोण इत्याख्या। नवमस्य त्रित्रिकोणमित्यपि च।।१६।।

**धीः पञ्चमं तृतीयं दुश्चिक्यं सप्तमं तु यामित्रम्।**
**द्यूनं द्यूनं न तद्वच्छिद्रमष्टमं द्वादशं रिष्फम् ।। १७।।**

पञ्चमतृतीयसप्तमाष्टमद्वादशस्थानानां संज्ञान्तरमाह। लग्नात्पञ्चमस्थानं धीसज्ञं तृतीयं दुश्चिक्यसंज्ञं सप्तमं यामित्रसंज्ञं द्यूनं द्यूनं च तत्तदेव सप्तमस्थानं सप्तमं यामित्रसंज्ञा द्यूनसंज्ञं द्यूनसंज्ञं च अष्टमस्थानं छिद्रसंज्ञंछिद्रं त्रतपर्यायं लग्नाद् द्वादशं रिष्फसंज्ञम्।।१७।।

**भावानां केन्द्रादिसंज्ञाः -**

**केन्द्रचतुष्टयकण्टकलग्नाऽस्तदशमचतुर्थानाम्।**
**संज्ञा परतः पणफरमापोक्लीमं च तत्परतः ।। १८।।**

स्थानानां संज्ञान्तरमाह। लग्नचतुर्थसप्तमदशमानां चतुर्णां स्थानानां प्रत्येकस्य संज्ञात्रयं केन्द्रं चतुष्टयं

कण्टकमिति। तत्सर्वस्मात्केन्द्रात्परस्य पणफरमित्याख्या। सर्वस्मात्पणफरात्परस्यापोक्लीमे- त्याख्या ।। १८।।

**उपचयादि वर्गोत्तमनवांशाश्च -**

**त्रिषडेकादशदशमान्युपचयभवनान्यतोऽन्यथाऽन्यानि।**
**वर्गोत्तमा नवांशाश्चरादिषु प्रथममध्यान्त्याः।।१९।।**

उपचयापचयसंज्ञां नवांशकानां वर्गोत्तमसंज्ञां चाह। तृतीयषष्ठैकादशदशमानामुपचयमित्याख्या। अतोऽन्यथाऽन्यानि उपचयेभ्यो यान्यवशेषस्थानानि तान्यपचयानि इत्यर्थः। वर्गोत्तमा नवांशाश्चरराशिषु प्रथमनवांशस्य वर्गोत्तमः स्थिरराशिषु मध्यमस्य पञ्चमस्य द्विः स्वभावराशेश्चान्त्यस्य नवांशस्य। एतदुक्तं भवति। सर्वस्यैव राशैः स्वनवांशको वर्गोत्तमाख्य इति।।१६।।

**राशीनां दिन-रात्रि बलं शीर्षोदयः पृष्ठोदयः च -**

**मेषाद्याश्चत्वारः सधन्विमकराः क्षपाबला ज्ञेयाः।**
**पृष्ठोदया विमिथुनाःशिरसान्ये ह्युभयतो मीनः ।। २०।।**

राशीनां दिनारात्रिबलपृष्ठोदयत्वशीर्षोदयत्वमाह। मेषाद्याश्चत्वारो मेषवृषमिथुनकर्कटा धन्विमकराभ्यां सह एते षड्राशयो रात्रिबलिनः। अन्ये दिनबलाः। अत्र यद्यपि बलग्रहणमस्ति तथापि संज्ञामात्रं वेदितव्यं यथा रात्रिसंज्ञा तथा दिनसज्ञां इति। यतस्ते द्युबलं सन्ध्याद्यरात्रिबलिन इति। पृष्ठोदया विमिथुना इति। मेषवृषकर्कटधन्विमकराः पृष्ठोदयसंज्ञाः। अन्ये मिथुनसंहकन्यातुलावृश्चिककुम्भाः शीर्षोदयसंज्ञाः। मीनः शीर्षोदयः पृष्ठोदयश्चेति।।२०।।

**ग्रहाणाम् उच्च-नीच त्रिकोण स्थानानि -**

**अजवृषमृगाङ्गनार्काकमीनवणिजांशकेष्विनाद्युच्चः।**
**दशशिख्यष्टाविंशतितिथीन्द्रियत्रिनवविंशेषु ।। २१।।**
**उच्चानीचं सप्तममकादीनां त्रिकोणसंज्ञानि।**
**सिंहवृषाजप्रमदा -कार्मुकभृत्तौलिकुम्भधराः ।। २२।।**

अर्कादीनामुच्चराशीनाह। सारावल्याम्—

विंशतिरंशाः सिंहे त्रिकोणमपरे स्वभवनमर्कस्य।
उच्चं भागत्रितयं वृष इन्दोः स्यात्रिकोणमपरे स्युः।।

द्वादशभागा मेषे त्रिकोणमपरे स्वभं तु भौमस्य।
उच्चफलं कन्यायां बुधस्य तुङ्गांशकैः सदा चिन्त्यम्।।

परतस्त्रिकोणजातं पञ्चभिरंशैः स्वराशिजं परतः।
दशभिर्भागैश्चापे त्रिकोणमपरे स्वभं तु देवगुरोः।।

शुक्रस्यांशातिथयस्त्रिकोणमपरे स्वभं तुलायां च।
कुम्भे त्रिकोणनिजभे रविजस्य रवेर्यथा सिंहे।।

तद्यथा-आदित्यस्य मेष उच्चं चन्द्रस्य वृष उच्चं भौमस्य मृगो मकरः बुधस्य कन्या गुरोः कर्कः शुक्रस्य मीनः मन्दस्य वणिक् तुला एवं सर्वराशिषूच्चसंज्ञा दशादिषु भागेषु व्यवस्थिताः परमोच्चस्था भवन्ति। तद्यथा मेषस्य दशमांशे व्यवस्थितोऽर्कः परमोच्चस्थो भवति वृषस्य तृतीयभागे चन्द्रः मकरस्याष्टाविंशतिभागे भौमः कन्यायाः पञ्चदशे बुधः कर्कटस्य पञ्चमे जीवः मीनस्य सप्तविंशे शुक्रस्तुलायां विंशतितमे सौरिः एवं विधाः परमोच्चरस्था उदिताः ग्रन्थान्तरे च।

रवेर्मेषतुले प्रोक्ते चन्द्रस्य वृषवृश्चिकौ।
भौमस्य मृगकर्कौ च कन्यामीनौ बुधस्य च।।
जीवस्य कर्कमकरौ मीनकन्ये सितस्य च।
तुलामेषौ च मन्दस्य उच्चनीचे उदाहृते।।

ग्रहाणामुच्चनीचस्थानानि त्रिकोणानि चाह। यस्य ग्रहस्य यदुच्चं तस्मादुच्चस्थानात्। सप्तमं नीचसंज्ञं तत्र दशादिष्वंशेषु परमनीचत्वं ज्ञेयम्। अत्र न्यासः एवं विधाः सूर्यादयः परमनीचस्था भवन्ति। अर्कादीनां त्रिकोणसंज्ञानीति। आदित्यस्य सिंहस्त्रिकोणाख्यः चन्द्रमसो वृषःभौमस्य मेषः बुधस्य कन्या जीवस्य धनुः शुक्रस्य तुला मन्दस्य कुम्भ इत्यर्थः।।२१-२२।।

**ग्रहाणां षड्वर्गसंज्ञा-**

**गृहहोराद्रेष्काणा नवभागो द्वादशांशकस्त्रिंशः।**
**वर्गः प्रत्येतव्यो ग्रहस्य यो यस्य निर्दिष्टः ।। २३।।**

%भट्टोत्पल% षड्वर्गज्ञानार्थमाह। आत्मीयो राशिर्ग्रहस्य गृहसंज्ञः। आत्मीया होरा आत्मीयश्च द्रेष्काणः आत्मीयो नवमभागः आत्मीयो द्वादशांशः आत्मीयस्त्रिंशद्भागः एतेषां षड्वर्गसंज्ञा यद्यप्येव तथाप्यात्मीयेषु स्थितः स्ववर्गस्थो भवति। वर्गशब्दस्य समुदायवाचित्वात् यत्र चन्द्रार्कयोः त्रिंशांशकाभावो भौमादीनां होराभावः एवं षष्ठानामसम्भवः। स्वगृहाधिष्ठितो वर्गस्थः। परवर्गस्थस्याप्येवमेवेति ज्ञातव्यम्।। २३।।

## इति लघुजातके राशिप्रभेदाध्यायः।।१।।

***********************

## ग्रह-प्रभेदाध्यायः- २

**कालपुरुषस्य आत्मादिविभागः -**

**आत्मा रविः शीतकरस्तु चेतः**
**सत्त्वं धराजः शशिजोऽथ वाणी।**
**ज्ञानं सुखं चेन्द्रगुरुर्मदश्च**
**शुक्रः शनिः कालनरस्य दुःखम्।।१।।**

**आत्मादयो गगनगैर्बलिभिर्बलवत्तराः।**
**दुर्बलैर्दुर्बला ज्ञेया विपरीतः शनिः स्मृतः।।२।।**

**ग्रहाणां राजादिविभागः -**

**राजा रविः शशधरश्च बुधः कुमारः**
**सेनापतिः क्षितिसुतः सचिवौ सितेज्यौ।**
**भृत्यस्तथा तरणिजः सबला ग्रहाश्च**
**कुर्वन्ति जन्मसमये निजमेव रूपम्।।३।।**

**पूर्वादि दिशाशु स्वामी तथा शुभपाप ग्रहाः -**

**प्राच्यादीशा रविसितकुजराहुयमेन्दुसौम्यवाक्पतयः।**
**क्षीणेन्द्वर्कयमाराः पापास्तैः संयुतः सौम्यः।।४।।**

अथातो ग्रहयोनिप्रभेदाध्यायं व्याख्यास्यामः। तत्रादौ ग्रहाणां दिक्स्वाम्यं सौम्यपापत्वं चाह। तत्र पूर्वस्यां दिश्यर्कोऽधिपतिः, पूर्वदक्षिणस्यां शुक्रः, दक्षिणायां भौमः, दक्षिणपश्चिमायां राहुः, पश्चिमायां सौरिः, पश्चिमोत्तरायां चन्द्रः, उत्तरस्यां बुधः, उत्तरपूर्वस्यां जीवः। तद्यथा पूर्वे रविः, अग्नेय्यां शुक्रः, दक्षिणे कुजः, नैऋत्यां राहुः, पश्चिमे शनिः, वायव्यां चन्द्रः, उत्तरस्यां बुधः, ईशान्यां गुरुः। क्षीणेन्द्वर्कयमारा इति। कृष्णपक्षस्याष्टम्या ऊर्ध्वं शुक्लपक्षस्याष्टमीं यावत्क्षीणचन्द्रो भवति। क्षीणश्चन्द आदित्याङ्गारकशनैश्चराः पापसंज्ञकास्तैः संयुतो बुधोऽपि पापो भवति। एषां पापानां मध्येऽन्यतमेन युक्तो बुधः पाप एव अर्थादेवाऽक्षीणचन्द्रमाः सौम्यः बुधबृहस्पतिशुक्राश्च सौम्या ज्ञेया इति ।। ४।।

**ग्रहाणां पुं-स्त्रीसंज्ञाः वेदाधिपत्यं च -**

**क्लीबपती बुधसौरी चन्द्रसितौ योषितां नृणां शेषाः।**
**ऋगथर्वसामयजुषामधिपा गुरुसौम्यभौमसिताः।।५।।**

ग्रहाणां स्त्रीपुन्नपुंसकाऽधिपत्यं शाखाधिपत्यं चाह। बुधशनैश्चरौ नपुंसकाधिपती, चन्द्रसितौ स्त्रीणामधिपती, शेषा आदित्याङ्गारकबुहस्पतयस्ते नृणामधिपतयः। प्रयोजनं चोरज्ञानादि। ऋगथर्वेत्यादि। ऋग्वेदाधिपतिर्जीवः, अथर्ववेदाधिपतिर्बुधः, यजुर्वेदाधिपतिः शुक्रः, सामवेदाधिपतिर्भौमः प्रयोजनं बलवति शाखाधिपतौ कुले जातस्तद्विद्याश्रेष्ठो ब्राह्मणो भवति। ब्राह्मणे चोरविज्ञानशाखाविज्ञानग्रहपीडायां तच्छाखापठनं पूजनमिति।।५।।

**ब्राह्मणादि वर्ण स्वामिनः -**

**जीवसितौ विप्राणां क्षत्राणां रविकुजौ विशां चन्द्रः।**
**शूद्राधिपः शशिसुतः शनैश्चरखः सङ्करभवानाम्।।६।।**

ग्रहाणां वर्णाधिपत्यमाह। जीवशुक्रौ ब्राह्मणानामधिपती, सूर्याङ्गारकौ क्षत्रियाणामधिपतिश्चन्द्रो वैश्याधिपतिः बुधः शूद्राधिपतिः शनैश्चरः संकरभवानामधिपतिः प्रतिलोमजानां सूतमागधादीनामित्यर्थः।।६।।

**ग्रहाणां स्थानबलम्-**

**बलवान् स्वगृहोच्चांशे मित्रर्क्षे वीक्षितः शुभैश्चापि।**
**चन्द्रसितौ स्त्रीक्षेत्रे पुरुषक्षेत्रोपगाः शेषाः।।७।।**

%भट्टोत्पल% बलाबलकरणमाह। मित्रक्षेत्रस्थो ग्रहो बलवान् भवति स्वगृहस्थः स्वोच्चस्थः स्वनसंशकस्थश्च उच्चादिसाहचर्यात् त्रिकोणस्थोऽपि। यस्मादुक्तं स्वोच्चसुहृत्स्वत्रिकोणनवांशैः स्थानबलमिति वीक्षितः शुभैश्चापि यतस्तत्रस्थो ग्रहः शुभैर्दृष्टो बलवान् भवति। चन्द्रसितौ स्त्रीक्षेत्रे वृषादौ समाराशौ व्यवस्थितौ बलिनौ भवतः शेषा आदित्याङ्गारकबुधजीवसौरयः पुरुषक्षेत्रस्थाः विषमराशौ मेषादौ व्यवस्थिताः बलवन्तो ज्ञेया इति।।७।।

**ग्रहाणां दिग्बलं, चेष्टाबलं च -**

**प्राच्यादिषु जीवबुधौ सूर्यारौ भास्करिः शशाङ्कसितौ।**
**उदगयने शशिसूर्यौ वक्रेऽन्ये स्निग्धविपुलाश्च।।८।।**

दिग्बलचेष्टावलज्ञानार्थमाह। पूर्वदिक्स्थौ जीवबुधौ बलिनौ भवतः लग्नगतावित्यर्थः। आदित्याङ्गारकौ दक्षिणस्थौ बलिनौ दशमस्थावित्यर्थः। शनैश्चरः पश्चिमस्थो बली लग्नात् सप्तमस्थ इत्यर्थः। चन्द्रशुक्रावुत्तरस्थौ बलिनौ चतुर्थस्थावित्यर्थः। एतद्दिग्बलम्। अथ चेष्टाबलम्। उदगयन इत्यादि-मकरादिराशिषट्के वर्तमानोदगयनस्थो भवति कर्कादिराशिषट्के वर्तमानो दक्षिणायनस्थश्च। तत्रोत्तरायणस्थौ अर्कशशिनौ बलिनौ। वक्रेऽन्ये। स्फुटगत्या प्रतीपगतयः वक्रिण उच्यन्ते। भौमादयो वक्रगताश्च बलिनो भवन्ति। तथा गगने स्निग्धा दृश्यमाना बलिनो भवन्ति विपुला बृहत्प्रमाणा दृश्या वा ।। ८।।

**ग्रहाणां कालबलम् -**

**अहनि सितार्कसुरेज्या द्युनिशं ज्ञो नक्तमिन्दुकुजसौराः।**
**स्वदिनादिष्वशुभशुभा बहुलोत्तरकपक्षयोर्बलिनः ।। ९।।**

कालबलमाह। अहनि दिवसे शुक्रादित्यजीवा बलिनः। ज्ञो बुधः द्युनिशं अहोरात्रे बली। नक्तं रात्रौ चन्द्राङ्गारकशनैश्चरा बलिनः। स्वदिनादिष्विति स्वदिवसे सर्वे ग्रहा बलिनो भवन्ति। आदिग्रहणात् स्वाब्दे स्वमासे स्वकाले होरायां च। अशुभशुभा इति। अशुभाः पापाः बहुलपक्षे कृष्णपक्षे बलिनः, शुभाः सौम्याः शुक्लपक्षे बलिनः।।९।।

**ग्रहाणां नैसर्गिकबलम् -**

**मन्दारसौम्यवाक्पतिसितचन्द्रार्का यथोत्तरं बलिनः।**
**नैसर्गिकबलमेतद् बलसाम्येऽस्माद् बलाधिकता।।१०।।**

नैसर्गिकबलमाह। सर्वेभ्यो ग्रहेभ्यो मन्दो हीनबलः मन्दादङ्गारको बलवान् अङ्गारकाद्बुधः बुधाज्जीवः जीवाच्छुक्रः शुक्राच्चन्द्रः चन्द्रादादित्यः एतद्ग्रहणां नैसर्गिकं स्वाभाविकबलम्। बलसाम्योऽस्मादधिकचिन्ता। यत्र पूर्वोक्त ग्रहयोस्तुल्यबलं भवति तत्र नैसर्गिकबलेन चाधिकबलः स ततो बलवान् भवति।।१०।।

ग्रहाणां स्थानबलम्

**मित्रक्षेत्रे स्वोच्चे स्वहोरायां स्वभवनत्रिकोणे च।**
**स्वद्रेष्काणे स्वांशे स्वदिने च बलान्विताः सर्वे ।। ११।।**

स्थानबलज्ञानमाह। मित्रक्षेत्रस्थो ग्रहो बलवान् भवति, स्वोच्चस्थः स्वगृहस्थः स्वत्रिकोणस्थः स्वद्रेष्काणस्थः स्वहोरास्थः स्वांशस्थः स्वदिनस्थः एतेषु स्थानेषु स्थितो ग्रहो बलवान् भवति।।११।।

**ग्रहाणां दृष्टिस्थानम् -**

**दशम-तृतीये नव-पञ्चमे चतुर्थाष्टमे कलत्रं च।**
**पश्यन्ति पादवृद्ध्या फलानि चैवं प्रयच्छन्ति ।। १२।।**

दृष्टिज्ञानार्थमाह। यस्मिन् स्थाने ग्रहः स्थितः तस्माद्दशमे तृतीये च पाददृष्ट्या पश्यति, नवमे पञ्चमे चार्धदृष्ट्या पश्यति, चतुर्थाष्टमे पदाहीनं पश्यति, त्रिभिः पादैरित्यर्थः। कलत्रं सप्तमं सम्पूर्णदृष्ट्या पश्यति। एवं सर्वे ग्रहाः पश्यन्ति चैवं प्रयच्छन्ति। यत्र पादमेकं पश्यति तत्र पादमेकं फलं ददति। यत्र पादद्वयं पश्यति तत्र पादद्वयफलम्। तत्र पादत्रयं पश्यति तत्र पादत्रयफलम्। यत्र सम्पूर्णं पश्यति तत्र सम्पूर्ण फलं प्रयच्छन्ति।।१२।।

**ग्रहाणां विशेष दृष्टिः -**

**पूर्णम्पश्यति रविजस्तृतीयदशमे त्रिकोणमपि जीवः।**
**चतुरस्त्रं भूमिसुतः सितार्कबुधहिमकराः कलत्रं च।।१३।।**

**इति लघुजातके ग्रहप्रभेदाध्यायः।।२।।**

************

# ग्रहमैत्री विवेकाध्यायः-३

**मित्रामित्राणि अन्येषां मते -**

**मित्राण्यर्कात्जीवो ज्ञगुरू ज्ञसितौ विभास्करा विकुजाः।**
**वीन्द्वर्का विकुजरवीन्दवश्च केषांचिदरयोऽन्ये।।१।।**

अथ मित्रप्रकरणमारभ्यते।। तत्रादौ परमतेन मित्रामित्राण्याह। अर्कात् प्रभृति मित्राणि तत्रादित्यस्य जीवो मित्रं शेषाः शत्रवः,चन्द्रस्य बुधजीवौ मित्रे शेषाः शत्रवः, कुजस्य बुधशुक्रौ मित्रे शेषाः शत्रवः, बुधस्य विगतार्काः सर्वे मित्राणि रविः शत्रुः, जीवस्य विगतकुजाः सर्वे मित्राणि कुजःशत्रुः, शुक्रस्य विगतचन्द्रार्काः सर्वे मित्राणि चन्द्रार्कौ तस्यशत्रू, शनैश्चरस्य विगताङ्गारकसूर्यचन्द्राः सर्वे मित्राणि चन्द्रार्कभौमास्तस्य शत्रवः एतत्केषञ्चिदाचार्याणां मतम्।।१।।

**सत्याचार्यानुसारं ग्रहाणां नैसर्गिकशत्रवः मित्राणि च -**

**शत्रू मन्दसितौ समश्च शशिजो मित्राणि शेषा रवे-**
**स्तीक्ष्णांशुहिंमरश्मिजश्च सुहृदो शेषाः समाः शीतगोः।**
**जीवेन्दूष्णकराः कुजस्य सुहृदो ज्ञोऽरिः सितार्की समौ**
**मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे।। २।।**

**सूरेः सौम्यसितावरी रविसुतो मध्योऽपरे त्वन्यथा**
**सौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी**
**शुक्रज्ञौ सुहृदौ समः सुरगुरुः सौरेस्तथाऽन्येरय-**
**स्तत्काले च दशाऽयबन्धुसहजस्वाऽन्त्येषु मित्रं स्थितः।। ३।।**

अथ सत्यमतमंगीकुर्वन् मित्रादिविभागं सर्वग्रहाणां तात्कालिकं मित्रामित्रं चाह। रवेर्मन्दसितौ शत्रू, बुधः समः, शेषा ग्रहाः चन्द्राङ्गारकजीवाः रवेर्मित्राणि एवमादित्यस्य। अथ चन्द्रस्य तीक्ष्णांशुरित्यादि। शीतगोश्चन्द्रस्यार्कबुधौ मित्रे, शेषा भौमजीवशुक्रसौरा अस्य समाः मध्यस्था इत्यर्थः।। एवं चन्द्रस्य। अथाङ्गारकस्य जीवेन्दूष्णकरा इति कुजस्य भौमस्य जीवेन्दूष्णकरा गुरुचन्द्रसूर्या मित्राणि, ज्ञो बुधः शत्रुः, सितार्की शुक्रमन्दौ समौ मध्यस्थौ२। एवमङ्गारकस्य। अथ बुधस्य मित्रे सूर्यसिताविति। बुधस्यादित्यशुक्रौ मित्रे, हिमगुश्चन्द्रः शत्रुः, समाश्चापरे भौम-जीवशनैश्चराः बुधस्य समा मध्यस्थाः एवं बुधस्य।। २।।

अथ गुरोः सूरेरिति। सूरेर्बृहस्पतेः सौम्यसितौ बुधशुक्रौ शत्रू, रविसुतः शनैश्चरो मध्यस्थः, अपरे तु मित्राणि चन्द्राङ्गारकार्का गुरोर्मित्राणि। एवं जीवस्य। अथ शुक्रस्य सौम्यार्की बुधसौरी मित्रे समौ कुजगुरू भौमजीवौ मध्यस्थौ, शेषावर्कचन्द्रावरी। एवं शुक्रस्य। अथ सौरेः। शुक्रज्ञाविति शनैः शुक्रबुधौ

मित्रे जीवः समः अन्ये चन्द्रार्कसौमा अरयः। एवं सौरस्य। नैसर्गिकमित्रामित्रविभागमुक्त्वा तात्कालिकमाह-तत्काले चेति। इष्टकाले यस्मिन्स्थाने ग्रहः स्थितस्तस्माद्दशमस्थाने एकादशे चतुर्थे तृतीये द्वितीये अन्ये द्वादशे ये ग्रहस्थितः स तात्कालिकमित्रं भवति।। ३।।

**नैसर्गिक-तात्कालिकमित्रामित्रेण पञ्चधा मैत्री-**

**मित्रमुदासीनोऽरिर्वायख्याता ये निसर्गभावेन-**
**तेऽधिसुहृन्मित्रसमास्तत्कालमुपस्थिताश्चिन्त्याः।। ४।।**

मित्रस्थानानां प्रयोजनमाह। दर्शितेषु मित्रस्थानेषु दशादिकेषु मित्रमवस्थितमधिमित्रं भवति, मध्यमस्थं मित्रं भवति, शत्रुव्यस्थितो मध्यस्थो भवति, अर्थादेव मित्रस्थानव्यतिरिक्तानि स्थानानि शत्रुस्थानानि भवन्ति। तानि च प्रथमपञ्चाष्टषट्सप्तमनवमानि तेषु स्थानेषु ग्रहस्य नैसर्गिकः शत्रुर्व्यवस्थिताऽधिशत्रुर्भवति। मध्यस्थो व्यवस्थितः शत्रुर्भवति मित्रमवस्थितः समो भवति।।४।।

**तात्कालिकशत्रवः -**

**मूलत्रिकोण षष्ठत्रिकोण निधनैकराशिसप्तमगाः।**
**एकैकस्य यथा सम्भवन्ति तात्कालिका रिपवः।।५।।**

**इति लघुजातके ग्रहमैत्रीविवेकाध्यायः।।३।।**

**- - -**

# ग्रहस्वरूपाध्यायः-४

**सूर्यस्यस्वरूपगुणौ -**

**चतुरस्रो नात्युच्चस्तनुकेशः पैत्तिकोऽस्थिसारश्च।**
**शूरो मधुपिङ्गात्रो रक्तश्यामः पृथुश्चार्कः।।१।।**

अथ ग्रहाणां स्वरूपमाह। चतुरस्रो न्यग्रोधमण्डलाकारः यावदेव प्रसारितभुजद्वयस्य विस्तीर्णत्वं तावदेवास्य दैर्ध्यम्, नात्युच्चः किञ्चिदुच्च एव, तनुकेशी विरलकेशः, पैत्तिकः पित्तप्रकृतिः, अस्थिसारो दृढास्थिः, शूरः सङ्ग्रामप्रियः, मधुपिङ्गाक्षः ईषत् पिङ्गालोचनः, रक्तश्यामो लोहितश्याम- रक्तश्चासौ स्यामश्च, पृथुर्विस्तीर्णशरीरः, एवंविधोऽर्कः।।१।।

**चन्द्रस्य स्वरूप-गुणौ -**

**स्वच्छः प्राज्ञो गौरश्चपलः कफवातिको रुधिरसारः।**
**मृदुवाग् घृणी प्रियसखस्तनुवृत्तश्चन्द्रमः प्रांशुः।।२।।**

स्वच्छो दर्शनीयः, प्राज्ञो मेधावी, गौरः श्वेतप्रायः, चपलः क्रियास्ववस्थितः कफवातिको वातश्लेष्मप्रकृतिः, रुधिरसारो रक्ताधिकः, मृदुवाक्कोमलभाषी, घृणी दयावान्, प्रियसखो मित्रप्रियः, तनुवृत्तः कृशवर्तुलाङ्गः, प्रांशुरुच्चः एवंविधश्चन्द्रमाः।।२।।

**भौमस्य स्वरूप-गुणौ**

**हिंस्रो ह्रस्वस्तरुणः पिंगाक्षः पैत्तिको दुराधर्षः।**
**चपलः सरक्तगौरो मज्जासारश्च माहेयः।।३।।**

हिंस्रो दुष्टो, ह्रस्वोऽल्पोच्छ्रायः, तरुणःसदैव तरुणाकारः, पिङ्गाक्षः कपिलनेत्रः, पैत्तिकः पित्तप्रकृतिः, दुराधर्षः दुराचारी, चपलोऽनेकमतिः, सरक्तगौरः पद्मपत्राग्रवर्णः, सज्जासारो मज्जाधिकः एवंविधो माहेयोऽङ्गारकः।।३।।

**बुधस्य स्वरूप-गुणौ**

**मध्यमरूपः प्रियवाग् दूर्वाश्यामः शिराततो निपुणः।**
**त्वक्सारस्त्रिस्थूणः सततं हृष्टस्तु चन्द्रसुतः।।४।।**

अत बुधस्याह। मध्यमरूपो न दर्शनीयः नाप्यदर्शनीयः, प्रियवाक् अभिमतवक्ता, दूर्वाश्यामः शाद्वलवर्णाभः,शिराततो दृश्यस्नायुः, निपुणः क्रियासु सूक्ष्मदृक्, त्वक्सारः स्थूलत्वक्, त्रिस्थूणो वातपित्तकफप्रकृतिः, सततं हृष्टो नित्यं हर्षितः एवंविधो बुधः।।४।।

**बृहस्पतेः स्वरूप-गुणौ -**

**मधुनिभनयनो मतिमानुपचितमांसः कफात्मको गौरः।**

**ईषत्पिङ्गलकेशो मेदः सारो गुरुर्दीर्घश्चः।।५।।**

बृहस्पतेराह। मधुनिभनयनः ईषत्कातरलोचनः, मतिमान् बुद्धिमान्, उपचितमांसः स्थूलदेहः. कफात्मकः श्लेष्मप्रकृतिः,गौरः श्वेतप्रायः, ईषत्पिङ्गलकेशः, मेदःसारो मेदोऽधिकः, अदीर्घः ह्रस्व एवंविधो गुरुः।।५।।

**शुक्रस्य स्वरूप -गुणौ -**

**श्यामो विकृष्टपर्वा कुटिलासितमूर्द्धजः सुखी कान्तः।**
**कफवातिको मधुरवाग्भृगुपुत्रः शुक्रसारश्च ।। ६।।**

श्यामः किञ्चित्कृष्णाङ्गः,विकृष्टपर्वा विरलशरीरसन्धिः, कुटिलासितमूर्द्धजः कुञ्चितकृष्णकेशः, सुखी भोगी, कान्तो दर्शनीयः, कफवातिको वातश्लेष्मप्रकृतिः, मधुरवाक्कोमलभाषी, शुक्रसारः शुक्राऽधिकः एवंविधः शुक्रः ।। ६।।

**शनेः स्वरूप-गुणौ -**

**कृशदीर्घः पिङ्गाक्षः कृष्णः पिशुनोऽलसोऽनिलप्रकृतिः।**
**स्थूलनखदन्तरोमा शनैश्चरो स्नायुसारश्च ।। ७।।**

अथ शनिमाह। कृशदीर्घो दुर्बलोन्नतः, पिङ्गाक्षः कपिलनेत्रः, कृष्णः श्यामवर्णवान्, पिशुनः पररन्ध्रसूचकः अलसो मन्थरगामी, अनिलप्रकृतिः, वातात्मकः स्थूलनखदन्तरोमास्नायुसारः एवंविधः शनैश्चरः।।

**ग्रहगुण-स्वरूपयोः प्रयोजनम् -**

**एते ग्रहा बलिष्ठाः प्रसूतिकाले नृणां स्वमूर्तिसमम्।**
**कुर्युर्देहं नियतं बहवश्च समागता मिश्रम्।।८।।**

**इति लघुजातके ग्रहस्वरूपाध्यायः।।४।।**

---

# आधानाध्यायः-५

**आधानेऽस्तगृहं यत्तच्छीलो मैथुने पुमान् भवति।**
**सायासमसद्युतवीक्षिते विदग्धं शुभैरस्ते ।। १।।**

अथाधानं व्याख्यास्यामः। तत्रादौ मैथुनकृतज्ञानमाह। आधार्म बीजक्षेपःश तत्र आधाने प्रश्नकाले च यो लग्नराशिस्तस्माद्यो राशिः सप्तमः तन्नामा जन्तुर्येन प्रकारेण मैथुनं करोति तेन प्रकारेण युक्तो मैथुनकारी पुमानिति वक्तव्यम्। तस्मिन्सप्तमे स्थाने पापग्रहैर्युते दृष्टेवा तन्मैथुनं सायासं श्रमयुक्तमासीत्। तस्मिन्नेव सप्तमे स्थाने शुभैर्युते दृष्टे वा दिवग्धं श्रमरहितं च तन्मैथुनमासीत्। मिश्रैर्युते दृष्टे वोभयरूपं सामान्यात्। न केनचिद्युते न दृष्टे वा न सायासं नापि विदग्धमिति।।१।।

**सौरांशेऽब्जांशे वा चंद्रः सौरान्वितोऽथ हिबुके वा।**
**शान्तो दीपो जन्मन्याधाने चेन्न रविदृष्टः।।२।।**

आधानकाले जन्मकाले प्रश्नकाले वा दीपस्याभावज्ञानमाह सौरांशे यत्र तत्र राशौ मकरकुम्भयोरन्यतरनवांशस्थे चन्द्रमसि तमस्यन्धकारे आधानं प्रसवश्च वक्तव्यः। अब्जांशे वा कर्कटमीनयोरन्यतमनवांशस्थे वा चन्द्रमसि तमस्येव। अथवा यत्र तत्रावस्थितश्चन्द्रमाः शनैश्चरयुतस्तदा तमस्येव अथवा लग्नाच्चन्द्रश्चतुर्थो भवति तदाऽन्धकार एव शान्तो दीपः प्रशान्त इत्यर्थः। एतदाधानलग्नाज्जन्मलग्नात् प्रश्नलग्नाच्च विचारणीयम्। अत्र सर्वयोगेषु यद्यर्कयुक्तश्चन्द्रमा भवति तदाऽन्धकाराभावः।।२।।

**चन्द्रो यावत्संख्ये द्वादशभागे निषेकसमये स्यात्।**
**तस्मात् तावति राशौ जन्मेन्दौ सम्भवे मासि ।। ३।।**

**उदयति मृदुभांशे सप्तमस्थे च मन्दे**
**यदि भवति निषेकः सूतिमब्दत्रयेण।**
**शशिनि तु विधिरेष द्वादशेऽब्दे प्रकुर्या-**
**निगादितमिह चिन्त्यं सूतिकालेऽपि युक्त्या ।। ४।।**

**यमवक्रौ द्यूनेऽर्कात्पुंसो रोगप्रदौ स्त्रियश्चन्द्रात्।**
**तन्मध्यगयोर्मृत्युस्तदेकयुतदृष्टयोश्चैवम् ।। ५।।**

आधानजन्ममध्ये पित्रोः शुभाऽशुभज्ञानमाह। आधानकाले प्रश्नकाले वा अर्काक्रान्तराशितः सप्तमे स्थाने यदि शनिभौमौ भवतस्तदा प्रसवादर्वाक् पुरुषस्य रौगादौ व्याधिकरावित्यर्थः। एवं चन्द्रात्सप्तमे राशौ शनिभौमो भवतस्तदा स्त्रियो रोगकरौ भवतः। तन्मध्यगयोः मृत्युः। तदिति शनैश्चराङ्गारकौ तयोर्मध्यस्थितयोश्चन्द्रार्कयोर्यथासङ्ख्येत स्त्रीपुंसोर्मृत्युकरौ भवतः। तत्रादित्याद्यदा शनिभौमयोरेको द्वादशस्थो द्वितीयो द्वितीयस्थो भवति तदा प्रसवादर्वाक् पुरुषो म्रियते। अथ चन्द्रादेको द्वादशस्थो द्वितीयो द्वितीयस्थो भवति तदा प्रसवादर्वाक् स्त्री म्रियत इत्यर्थः। तस्मिन्नपि राशौ शनिभौमाभ्यामेकेन

भुक्ताशकानतिक्रम्य द्वितीयेन भुज्यमानमप्राप्य यद्यर्कचन्द्रयोरन्यतरस्यावस्थानं तदाप्यसौ मध्यगत एव भवति। तदापि स्त्रीपुंशयोरेकतरस्य मृत्युभवति। तदेकयुतदृष्टयोश्चैवमिति। तयोः शनिभौमयोर्मध्यादेकन भानुर्यदा युक्तः परेण दृश्यते तदा प्रसवादर्वाक पुंसो मरणं भवति। तयोरेकेन युक्तं चन्द्रमासं यदाऽपरः पश्यति तदा प्रसवादर्वाक् स्त्री म्रियत इति।।५।।

**कललघनावयवास्थितग्रोमस्मृतिसमुद्भवाः क्रमशः।**
**मासेषु शुक्रकुजजीवसूर्यचन्द्रार्किसौम्यानाम् ।। ६।।**

**अशनोद्वेगप्रसवाः परतो लग्नेशचन्द्रसूर्याणाम्।**
**कलुषैः पीडा पतनं निपीडितैर्निर्मलः पुष्टिः ।। ७।।**

आधानमासादारभ्य माससप्रकाधिपतीन् ग्रहानाह। गर्भः प्रथमे मासे कललरूपो भवति सुक्रशोणितमिश्री भूतः तत्र गर्भस्य प्रथमे मासे शुक्रऽधिपतिः। द्वितीये शुक्रशशोणितस्य घनत्वं भवति तत्र कुजोऽधिपतिः। तृतीये मासे गर्भस्य हस्ताद्यवयवोत्पत्तिर्भवति तत्र जीवोऽधिपतिः। चतुर्थे मासि गर्भस्यास्थि सम्भवो भवति तत्राऽर्कोऽधिपतिः। पञ्चमे मासि त्वक् चर्मसम्भवो भवति तत्राऽर्कोऽधिपतिः पञ्चमे मासि त्वक् चर्मसम्भवो भवति तत्राऽधिपतिश्चन्द्रः। षष्ठे रोमाणि जायन्ते तत्र शनिरधिपतिः। सप्तमे स्मृतिसमुद्भवश्चैतन्यं भवति थत्र बुधोऽधिपतिः।

अतः क्रमेण मासत्रये गर्भस्य लक्षमं मासाधिपतीन् मासाधिपति प्रयोजनमाह। तत्राष्टमे मासि गर्भो मातुर्भुक्तमश्नाति तत्र तस्याधानलग्नस्य अधिपतिः स्वामी। नवमे मासे तस्य गर्भस्योद्वेगो भवति तत्र चन्द्रोऽधिपतिः। दशमे मासि प्रसवो भवति तत्राऽर्कः स्वामी। प्रयोजनमाह। कलुषैरिति। आधानकाले यः कलुषो विवर्णस्तस्य सम्बन्धिनि मासि गर्भस्य पीडा वक्तव्या। निपीडितैरिति। ग्रहेणान्येन ग्रहयुद्धे विजिते शिखिशिखाध्वस्ते उल्काहते वा ग्रहे तस्मिन्मासि गर्भपतनं वक्तव्यम्। निर्मलैः रश्मिसंयुक्तैर्गर्भस्य पुष्टिर्वक्तव्यः।। ६-७।।

**बलयुक्तौ स्वगृहांशेष्वर्कसितावुपचयर्क्षगौ पुंसाम्।**
**स्त्रीणां वा कुजचन्द्रौ यदा तदा गर्भसम्भवो भवति ।। ८।।**

**लग्ने बलिनि गुरौ न नवपञ्चमसंस्थितेऽपि वा भवति।**
**योगा हतबीजानामफला वीणेव बधिराणाम् ।। ९।।**

गर्भसम्भवासम्भवज्ञानमाह। यत्र कुत्र राशौ स्वराश्यंशकस्थावादित्यशुक्रौ बलयुक्तौ पुरुषस्य जन्मलग्नाज्जन्मराशेर्वा उपचयस्थाने भवतो यदा तदा गर्भस्य सम्भवो वक्तव्यः। अङ्गारकचन्द्रौ स्वाराशिनवांशस्थौ भवतः स्त्रियश्चोपचयर्क्षगौ भवतो यदा तदाऽपि गर्भसम्भवो भवति।

गर्भसम्भवयोगनिष्फलत्वं चाह। अथवा लग्नपञ्चमनवमानामेकस्मिन् स्थाने बलवान् बृहस्पतिर्भवति तदा गर्भसम्भवो वाच्यः। अथवाऽऽदित्यचन्द्रशुक्राङ्गारकाः सर्वे एव यदि स्वभागगाः स्त्रीपुंसोश्चोपचयस्था भवन्ति तदाऽपि गर्भसम्भवो भवति। यदुक्त च वराहेन। रवीन्दुशुक्रावनिजैरिति। हतबीजानां मध्ये स्त्रीपुंसोः अन्यतमो हतबीजो भवति तस्मिन् हतबीजे इमे योगा निष्फलो ज्ञेयाः।

किमिवेत्याह- यथा वीणा बदिराणां वाद्यमाना श्रुतिसुखं न जनयति तथैतेऽपि योगाः। पण्ढानां संयुक्तानामपि गर्भ सम्भवं न कुर्वन्ति।।८-९।।

**विषमर्क्षे विषमांशे संस्थिताश्च गुरुशशाङ्कलग्नार्काः।**
**पुञ्जन्मकराः समभेषु योषितां समनवांशगताः ।। १०।।**

अथ गर्भसम्भवज्ञानानन्तरं गर्भज्ञानमाह। विषमस्थैर्मेषमिथुनादिस्थैर्यथासम्भवं सर्वैरेव बृहस्पतिचन्द्रार्कलग्नैः न केवलं, यावत् प्रदर्शितराशिसम्बन्धिनवांशकगतैर्ग्रहैगर्भे पुरुषसम्भवो वक्तव्यः। समभेष्विति। एते बृहस्पतिचन्द्रलग्नार्का यदि समराशिषु वृषादिषु स्थितास्तदा स्त्रीजन्म कथनीयम्। न केवलं यावत्तत्सम्बन्धिनवांशकगता यदा भवेयुः तदाऽपि योषितां जन्मकरा भवन्ति। यथाऽभिहिता उभयविकल्पे यत्रैव बहवः स्थितास्तल्लिङ्गासम्भवनिर्देशः साम्ये च बलाधिकवशात्। उक्तं च बृहज्जातके -

**'ओजर्क्षे पुरुषांशकेषु बलिभिर्लग्नार्कगुविन्दुभिः।**
**पुंजन्म प्रवदेत् समांशसहितैर्युग्मेषु तैर्योषितः' ।। इति ।। १०।।**

**बलिनो विषमेऽर्कगुरू नरं स्त्रियं समगृहे कुजेन्दुसिताः।**
**यमलं द्विशरीराशेष्विन्दुजदृष्टाः स्वपक्षसमम् ।। ११।।**

पुनरपि गर्भलिङ्गज्ञानं यमलसम्भवज्ञानं चाह। विषमराशिगतौ यथासम्भवमादित्यबृहस्पती बलयुक्तौ भवतस्तदा नरो गर्भस्थो वाच्यः। समराशिष्वेवं यथासम्भवं सर्वे एव कुजचन्द्रशुक्रा बलिनो यदा भवन्ति तदा स्त्रीगर्भश्चेति वक्तव्यम्। यमलौ द्विशरीरांशेष्विति। द्विशरीरराशिनवांशकस्था आदित्यगुरुकुजेन्दुसिता बुधदृष्टाः यमलौ स्वपक्षे कुर्वन्त। एतदुक्त भवति। चत्वारो द्विःस्वभावा मिथुनमीनकन्याधन्विनः। तत्र मिथुनधन्विनौ पुरुषांशकौ कन्यामीनौ स्त्रयंशकौ तेन यथासम्भवं मिथुनधन्वंशगतावादित्यगुरू यदि बुधेन यत्र तत्रावस्थितेन दृश्यन्ते तदा यमलौ द्वौ पुरुपौ वाच्यौ एवं यथासम्भवं कन्यामीनांशगताः कुजेन्दुसिता यत्र तत्रावस्थितेन बुधेन दृश्यन्ते तदा यमले द्वे कन्ये वाच्ये। अथ दर्शितग्रहपञ्चकमपि द्विःस्वभावराशिसंस्थं यथा बुधः पश्यति तदा एकः पुरुषो वक्तव्य एका च कन्या वक्तव्या।।११।।

**लग्नाद्विषमोपगतः शनैश्चरः पुत्रजन्मदो भवति।**
**निगदितयोगबलाबलमवलोक्य विनिश्चयो वाच्यः।। १२।।**

पुजन्मयोगान्तरं स्त्रीपुरुषयोगयोर्द्वयोरपि सम्भवे सति निश्चयो वाच्य इत्याह। लग्नं भुक्त्वा विषमर्क्षगः सौरि लग्नात् तृतीयपञ्चमसप्तमनवमैकादशस्थानानामन्यतमस्थानस्थो यदा भवति तदा पुत्रजन्मदो भवति। एतान्योगान्दृष्ट्वा जन्मसमये प्रश्नकाले वा नरोत्पत्तिर्विज्ञेया। निगदितेत्यादि-यत्र पुरुषयोगसम्भवः स्त्रीजन्मसम्भवश्च तत्र यो योगो बलवद्ग्रहाभिर्निवृत्तस्तद्वशादेकतमस्य सम्भवो वक्तव्यः।। १२।।

**इति लघुजातके गर्भाधानाध्यायः।।५।।**

**Sanskrit**

**Prak-Sastri 2nd Year**
**Course/Paper.8**

**PART - B**

# षट्दर्शनसमुच्चयः

# *Ṣaṭdarśanasamuccayaḥ*


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# षड्दर्शनसमुच्चयः

**संरचना**

१.१. प्रस्तावना
१.२. उद्देश्यम्
१.३. दर्शनानां परिचयः
१.४. बौद्धमतम्
१.५. न्यायमतम्
१.६. सांख्यमतम्
१.७. जैनमतम्
१.८. कणादमतम्
१.९. मीमांसकमतम्
१.१०. चार्वाकमतम्
१.११. पाठ सारः
१.१२. ग्रन्थपरामर्सः
१.१३. आदर्शप्रश्नाः

## १.१. प्रस्तावना

प्रिय जिज्ञासवः छात्राः। कृपया अधोलिखितं पाठं सावधानेन पठन्तु। मानवः मननशीलो भवति। सः सर्वदा सुखम् इच्छति। अतः एव शास्त्रे सुखं मे स्यात् इति वचनं कथितम् अस्ति। तादृशं परमं सुखं ज्ञानात् मिलाति। अतः शास्त्रकाराः कथयन्ति ज्ञानात् ऋते न मुक्तिः इति। मुक्ति साधकं यत् ज्ञानम् तत् दर्शनशास्त्रतः मिलति। अत वयम् अद्य दर्शनशास्त्रं पठामः। तत्र विद्यमानानि रहस्यानि आलोचयामः।

## १.२. उद्देश्यम्

एतस्य पाठस्य पठनेन दर्शनपदार्थम् आलोचयिष्यन्ति।
षड्दर्शनानि कानि इति चन्तयिष्यन्ति।
षड्दर्शनेषु प्रमुखानाम् आचार्याणाम् आलोचनं करिष्यन्ति।
षड्दर्शनानां मुख्यप्रतिपाद्यविषयान् चिन्तयिष्यन्ति।
षड्दर्शनानां परमं प्रयोजनं वर्णयिष्यन्ति।

## १.३. दर्शनानां परिचयः

दर्शनम् इति पदस्य ज्ञानम् इति अर्थ अस्ति। इदं दर्शनं द्विप्रिकारकं भवति। प्राच्यदर्शनम्, पाश्चात्यदर्शनम् च। तत्र प्राच्यदर्शनस्य अपरं नाम भारतीयदर्शनम् अस्ति। भारतीयदर्शनस्य मुख्यभेदद्वयम् अस्ति। तत्र प्रथमः नास्तिकं दर्शनम्, द्वितीयः आस्तिकम् इति। आस्तिकं नाम– यस्मिन् दर्शने वेदः परमं प्रमाणं भवति तत् आस्तिकं दर्शनं भवति। यस्मिन् दर्शने वेदस्य प्रामाण्यं न अङ्गीक्रियते तत् नास्तिकदर्शनम् भवति। आस्तिकदर्शनं षड्विधं भवति। नास्तिकं दर्शनं त्रिविधं भवति। अत्र वयं षड्दर्शनानि पठामः। तानि षड्दर्शनानि एतानि सन्ति ----

१. बोद्धदर्शनम्
२. न्यायदर्शनम्
३. सांख्यदर्शनम्
४. जैनदर्शनम्
५. मीमांसादर्शनम्
६. चार्वाकदर्शनम् इति।

**स्वावलोकनप्रश्नाः**

१. दर्शनम् इति पदस्य अर्थः कः?
उ.

२. भारतीयदर्शनस्य मुख्यभेदद्वयं किम्?
उ.

३. आस्तिकदर्शनस्य निर्वचनं किम्?
उ.

४. षड्दर्शनानां नामानि लिखत?
उ.

५. नास्तिकदर्शनस्य विर्वचनं किम्?
उ.

## १.४. बौद्धमतम्

षड्दर्शनसमुच्चयवर्णनक्रमे ग्रन्थकारः हरिभद्रत्सूरिमहोदयः बौद्धदर्शनं प्रथमम् आलोचितवान्। आचार्य गौतमबुद्धः एतस्य दर्शनस्य प्रणेता। एतस्य दर्शनस्य देवता सुगत नाम भवति। अत एव दर्शनस्य अस्य अपरं नाम सौगतदर्शनम् अस्ति। निसपणं अस्ति। आर्यसत्यानि चत्वारि भवन्ति।

१. दुःखम् २. दुःखसमुदयः ३. दुःखनिरोधः ४. दुःखनिरोधोपायः च। दुःखपदेन पञ्चस्कन्धानां बोधो भवति। एतन्मते द्वादश आयतनानि भवन्ति। प्रमेयाणां निरुपणार्थं प्रत्यक्षम् अनुमानमिति प्रमाणद्वयम् एतस्मिन् दर्शने अङ्गीकृतम् अस्ति। आचार्य तथागतगौतमबुद्धः चतुर्णां शिष्याणां कृते उपदेशं दत्तवान्। तदुपदेशं श्रुत्वा चत्वारः शिष्याः चतुर्धामतानि प्रकटितवन्तः। अत एव अनन्तरकाले बौद्धमतं चतुर्धा अभवत्। तानि मतानि

एवं भूतानि भवन्ति---१. माध्यमिकमतम् १. योगाचारमतम् ३. सौत्रान्तिकमताम् ४. वैभाषिकं कमतम् इति कृपया एतत् रेखाचित्रं ध्यानेन पश्यन्तु।

**बौद्धमतम्**

- माध्यमिकमतम्
- योगाचारमतम्
- सौत्रान्तिकमतम्
- वैभाषिकमतम्

**स्वावलोकन प्रश्नाः**

१. बोद्धदर्शनस्य मुख्यप्रतिपाद्यो विषयः कः?

उ.

२. बोद्धदर्शनस्य प्रथमः आचार्यः कः?

उ.

३. दुःखम् इति पदेन केषां बोधो भवन्ति?

उ.

४. बौद्धमते प्रमाणद्वयं किम्?

उ.

५. बोद्धमतस्य चत्वारो विभागाः के भवन्ति?

उ.

## १.५. न्यायमतम्

प्रिय पाठकाः इतः पूर्वं भवन्तः बौद्धमतम् सामान्यतः आलोचितवन्तः। इदानीं न्यायमतस्य विचारणं करिष्यन्ति। न्यायः पदस्यार्थ नीयन्ते पदार्थाः अनेन इति न्यायः न्याय पदस्यार्थ अस्ति युक्तिः ,तर्कः, नियमः, विचारो वा। प्रथमाचार्यः गौतममुनिः अस्ति। इदं दर्शनं प्राचीन–नव्यम् इति भेदेन द्विविधं भवति। गौतममुनितः आरभ्य गङ्गेश उपाध्यायपर्यन्तं प्राचीन परम्परा भवति। गङ्गेश उपाध्यायतः नव्यन्याय परम्परायाः आरम्भो भवति। वेदशास्त्रविरोधितर्काणां निराकरणम्, वैदिकसिद्धान्तानां च रक्षणं न्यायदर्शनस्य प्रयोजनम् अस्ति। गौतममुनिप्रणीतं (न्यायसूत्रम्) न्यायदर्शनम्, एतस्य दर्शनस्य मूलाधारं भवति।

एतन्मते षोडशसंख्यकाः प्रमेयाः भवन्ति। एतेषां षोऽशप्रमेयानां निरुपणार्थं प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्द इति एतानि चत्वारि प्रमाणानि स्वीकृतानि सन्ति। निश्रेयसः (मोक्षः) दर्शनस्य अस्य मुख्यः प्रतिपाद्यो विषयो भवति। एतन्मते ज्ञानस्य अधिकरणम् आत्मा भवति। सः आत्मा जीवात्मा, परमात्मा च भवति। एतयोः परस्परं भेदम् एतन्मते अङ्गीकृतम्। परमाणवः सृष्टेः कारणं भवन्ति। दुःखस्य आत्यन्तिकनिवृत्तिद्वारा परमपुरूषार्थस्य मोक्षस्य सिद्धिर्भवति इति नैयायिका प्रकटयन्ति। ईश्वरः एतन्मते निमित्तकारणं भवति। सर्वम् ईश्वरेच्छया। भवति इति एतेषां विश्वासः। कृपया सावधानेन इमां सारणीम् पश्यन्तु।

**प्रमेयाः (१६)**

| | | | |
|---|---|---|---|
| १. प्रमाणम् | २.प्रमेयः | ३. संशयः | ४. प्रयोजनम् |
| ५. दृष्टान्तः | ६. सिद्धान्तः | ७. अवयवः | ८. तर्कः |
| ९. निर्णयः | १०. वादः | ११. जल्पः | १२. वितण्डा |
| १३. हेत्वाभासः | १४. छलः | १५. जातिः | १६. निग्रहस्थानम् |

**प्रमाणानि (४)**

| | | | |
|---|---|---|---|
| १.प्रत्यक्षम् | २.अनुमानम् | ३. उपमानम् | ४. शब्दः |

**स्वावलोकनप्रश्नाः**

१. न्यायदर्शनस्य प्रणेता कः?

उ.

२. न्यायमते प्रमेयाणां संख्या का?

उ.

३. न्यायदर्शनस्य मुख्यो विषयः कः?

उ.

४. न्यायमतस्य विभागद्वयं नाम किम्?

उ.

५. मोक्षः कथं मिलति?

## १.६. सांख्यमतम्

प्रिय छात्राः इतः पूर्वं न्यायदर्शनविषये भवन्तः पठितवन्तः। इदानीं साख्यदर्शनविषये पठिष्यन्ति। आगच्छन्तु आलोचयामः किं तत् सांख्यम् इति। सांख्यं नाम ज्ञानम् इति अर्थः। संख्यायन्ते सम्यक् ज्ञायन्ते प्रकृत्यादिनी पञ्चविंशतितत्त्वानि अनेन इति सांख्यम्। शुद्धात्मतत्त्वनिरुपकं शास्त्रं सांख्यम् इति वक्तुं पारयामः। एतस्य दर्शनस्य प्रणेता महर्षि कपिल अस्ति। तेन लिखितं सांख्यदर्शनम् इति पुस्तकं अस्य दर्शनस्य आधारग्रन्थो भवति। एतस्य दर्शनस्य मुख्यप्रतिपाद्यो विषयः कैवल्यं भवति सृष्टिनिर्बहणार्थं भोगार्थम् अपवर्गार्थं च पञ्चविंशतितत्त्वानि निर्दिष्टानि सन्ति। एतेषां पञ्चविंशतितत्त्वानां वर्गीकरणं सांख्यशास्त्रे एवम् अस्ति -- १. प्रकृतिः २. प्रकृतिः विकृतिः च ३. केवलविकृतिः ४, न प्रकृतिः न विकृतिः इति एतदेव आचार्य ईश्वरकृष्णः पद्यमाध्यमेन वर्णयति --

**मूलप्रकृतिरविकृतिर्महदाद्या प्रकृति विकृतयः सप्त।**
**षौडशकस्तु विकारो न प्रकृतिः न विकृतिः पुरूषः।। इति।**

सत्त्व-रज-तमोगुणानां साम्यावस्था प्रकृतिर्भवति। एषां प्रकृति निखिलस्यापि प्रपञ्चस्य कारणं भवति। महत् अहङ्कारः शब्द-स्पर्शरूप-रस-गन्धादीनि पञ्चतन्मात्राणि आहत्यसप्तसंख्यकानि इमानि प्रकृति-विकृति अर्थात् उभयतत्त्वानि भवन्ति। पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि पञ्चमहाभूतानि मनः च मिलिता इमानि षोडशसंख्यकानि तत्त्वानि केवलं विकृतितत्त्वानि भवन्ति। चेतनं असङ्गं एकम् पुरुषतत्त्वं न कस्यापि प्रकृतिः न वा कस्यापि विकृतिः भवति अतः अनुभयरूपं अस्ति। एतेषां पञ्चविंशतितत्त्वानां स्मयक् ज्ञानेन मोक्षस्य प्राप्तिः निश्चयेन भवति। एतस्मिन् सन्दर्भे इदं पद्यं पठामः।

**पञ्चविंशतितत्त्वज्ञो यत्रतत्राऽश्रमे वसन्।**
**जटी मुण्डी-शिखी वापि मुच्यते नात्र संशयः।। इति।।**

प्रमेयनिरुपणार्थं सांख्यदर्शने त्रीणी प्रमाणानि स्वीकृतानि सन्ति। तानि प्रत्यक्षम्, अनुमानम्, शब्द प्रमाणानि भवन्ति। प्रकृतिपुरुषयोः संयोगात् सृष्टिर्भवति। प्रकृतिपुरुषयोर्वियोगात् मोक्षो भवति। सः मोक्षः त्रिविधदुःखस्य आत्यन्तिकनिवृत्तिद्वारा सम्भवति। कार्यम् उत्पत्तितः पूर्वं सत् इति एतस्मिन् दर्शने वर्णितम् अस्ति। **सावधानेन इमां सारणीं पश्यन्तु।**

| प्रकृतिः | प्रकृतिविकृतिः | विकृतिः | न प्रकृति न विकृतिः |
|---|---|---|---|
| मूलाप्रकृतिः सत्त्व-रज-तमो गुणानां साम्यावस्था जगत्कारणरूपा | महत् अहङ्कारः शब्दतन्मात्रम् ,स्पर्शतन्मात्रम् रूपतन्मात्रम्,रसतन्मात्रम् ग्रन्धतन्मात्रम् प्रकृतत्त्वस्यकार्याणि विकृति तत्त्वानां कारणानि | श्रोत्र-त्वक् चक्षु-रसनाघ्राण पञ्चज्ञानेन्द्रियाणि वाक पाणि-पाद-पायु उपस्थ पञ्चकर्मेन्द्रियाणि आकाश-वायु-आग्निः-आपः-पृधिवी पञ्चमहाभूतानि, मनः। इमानि केवलं कार्याणि भवन्ति। | असङ्गः कूट स्थः नित्यः पुरुषः न कार्यरूपः नापि कारणरूपः उदासीनः |

**स्वावलोकनप्रश्नाः**

१.सांख्यदर्शनस्य प्रणेता कः?

उ.

२.सांख्यतत्त्वानां चत्वारः प्रकाराः के?

उ.

३.सांख्यमते सृष्टिकारणं किम्?

उ.

४.प्रकृत्याः स्वरूपं कीदृशम् अस्ति?

उ.

५. सांख्यदर्शनस्य मुख्यप्रतिपाद्योविषयः कः?

उ.

## १.७. जैनमतम्

प्रिय छात्राः। भवन्तः एतावत् पर्यन्तं बौद्ध- न्याय- सांख्यदर्शन विषयेषु चर्चां कृतवन्तः। इदानीं नास्तिकदर्शनान्तर्गतस्य जैनमतस्य विषये आलोचनां करिष्यन्ति। आयान्तु पठामः किमिदं जैनमतम् इति। नास्तिकदर्शनेषु जैनदर्शनम् अतीव प्राचीनं भवति। जैनदर्शनस्य आर्हतदर्शनम् इति नामान्तरम् अस्ति। आचार्य ऋषभदेवः अस्यदर्शनस्य प्रणेता भवति। वर्धमान महावीर दर्शनस्य अस्य प्रतिष्ठापकः आचार्य अस्ति। जैनदर्शनस्य विश्वे सर्वत्र प्रतिष्ठापन वर्धमान महावीरजिनः कृतवान्। एतस्मिन् दर्शने आराध्यदेवः अर्हन् भवति। तस्यदेवस्य वर्णनविषये माधवाचार्यस्य इदं पद्यं पठामः--

**सर्वज्ञो वीतरागादि दोषस्त्रैलोक्य पूजितः।**
**यथा स्थितार्थवादी च देवोऽर्हन् परमेश्वरः।। इति।**

मोक्षः एतस्य दर्शनस्य मुख्यप्रतिपाद्यो विषयः अस्ति। जैनमते जीवः, अजीवः, आस्रवः, बन्धः, सम्बरः, निर्जरः, मोक्षः चेति सप्तपदार्थाः भवन्ति।

जैनागमानुसारेण जीवः चेतनः निसर्गतः एव अनन्तज्ञानविशिष्टो भवति। यदा जीवस्य प्राक्तनकर्मावरणस्य नाश भवति तदा सः स्व-शुद्धज्ञानस्वरूपं प्राप्नोति। स जीवः द्विविधो भवति। बद्धः जीवः, मुक्तजीवः इति। जीव न नित्यसंसारी अस्ति न वा नित्यमुक्तो भवति। एतस्मिन् इदं पद्यं पठामः--

**बद्धमुक्तविभेदेन ते जीवाः द्विविधामता।**
**न कश्चिन्नित्यसंसारी नित्यमुक्तो न कश्चन।। इति।**

जैनमते प्रमेयाणां निरूपणार्थं प्रत्यक्षं परोक्षम् इति प्रमाणद्वयं स्वीकृतम् अस्ति। जैनदर्शने ज्ञानं द्विविधम् अस्ति। एकं प्रत्यक्षं ज्ञानम्, अपरं परोक्षं ज्ञानम् इति। यत् ज्ञानम् आत्मसापेक्षम् अस्ति तत् प्रत्यक्षम्, यत्

ज्ञानम् इन्द्रियसपेक्षं तत् परोक्षम् इति व्यवस्था। एतन्मते परोक्षज्ञानं पञ्चविधाम् अस्ति। तच्च--
१. मतिज्ञानम् २. श्रुतिज्ञानम्, ३. अवधिज्ञानम्, ४. मनः पर्यायज्ञानम्, ५. केवलज्ञानञ्च एतस्मिन् सन्दर्भे इमां सारणी सावधानेन अवलोकयन्तु

**ज्ञानम्**

| | |
|---|---|
| १. प्रत्यक्षम्-आत्मसापेक्षम् | २. परोक्षम्, इन्द्रिय सापेक्षम्,<br>a. मतिज्ञानम्, b. मनः पर्यायज्ञानम्<br>c. श्रुतिज्ञानम्,केवलज्ञानम् d. अवधिज्ञानम् |

जैनदर्शने स्याद्वादः नाम कश्चन विलक्षणसिद्धान्तः अस्ति। एकस्य एव पदार्थस्य विविधाभिः दृष्टिभिः परीक्षणम् स्याद्वादो भवति। एतस्येव नामान्तरमस्ति सप्तभङ्गीनय इति। सप्तभङ्गीनयाः एवम्भूताः सन्ति--

१. स्यादस्ति　　　　२. स्यान्नास्ति
३. स्यादस्ति च नास्ति च　　　　४. स्यादवक्तव्यम्
५. स्यादस्ति च अवक्तव्यम्　　　　६. स्यान्नास्ति चावक्तव्यञ्च
७. स्यादस्ति च नास्ति च अवक्तव्यञ्च।

जैनमते सम्यक्दर्शनम्, सम्यक् ज्ञानम्, सम्यक् चरित्रम् च मोक्षसाधनम् अस्ति। जगत् एतन्मते वास्तवं भवति। सर्वावरणरहितः जीवः ईश्वर पदवाच्यो भवति। जैनमते कालः, आकाशः, धर्मः अधर्मः पुद्गलः इति एतानि पञ्चतत्त्वानि स्वीकृतानि सन्ति।

**स्वावलोकनप्रश्नाः**

१. जैनदर्शने के पदार्थाः सन्ति?

उ.

२. अर्हत् पदेन कस्य ग्रहणं भवति?

उ.

३. जैनमते परोक्षज्ञानं कतिविधम् अस्ति ?

उ.

४. जैनानां प्रमुखः सिद्धान्तः कः?

उ.

५. जीवस्य भेदद्वयं किम्?

उ.

## १.८. कणादमतम्

प्रिय छात्राः एतावत् पर्यन्तं भवन्तः बौद्ध–न्याय–सांख्य–जैनदर्शनानि आलोचितवन्तः। इदानीम् आस्तिकशिरोमणेः कणादस्य मतम् आलोचनीयम्। कणादमहर्षिद्वारा प्रणीतं मतं वैशेषिकदर्शनं भवति। महर्षि कणादः। विशेष नामकं पदार्थं विशिष्य अत्र निरूपितवान् अतः एतस्य नाम वैशेषिकम् अस्ति। वैशेषिकदर्शनं सर्वशास्त्रोपकारकं भवति। अतः उक्तमस्ति काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम् इति। वैशेषिकदर्शनस्य मुख्यः प्रतिपाद्यो विषयः अपवर्गः अस्ति। एतन्मते द्रव्य–गुण–कर्म–सामान्य–विशेष–समवाय–अभावः इति एते सप्त पदार्थाः सन्ति। महर्षिकणादेन रचितं वैशेषिकदर्शनपुस्तकं एतस्य दर्शनस्य आधारपुस्तकम् अस्ति। कणादमते नवद्रव्याणि चतुर्विंशतिगुणाः, पञ्चकर्माणि च भवन्ति। एतन्मते परमात्मा ईश्वरः जीवापेक्षया भिन्नः। परमात्मा सर्वज्ञः, विभु, नित्यशुद्धबुद्धस्वभावको भवति। जीवः कायव्यूहादिबद्धः जननमरणपरम्परायां संसरति इति वैशेषिकाः वर्णयन्ति। प्रमेयनिरुपणार्थं प्रत्यक्षम्, अनुमानम्, शब्द इति एतानि त्रिणी प्रमाणानि अङ्गीकृतानि सन्ति। **ध्यानेन इमां सारणीं पश्यन्तु**

| पदार्थाः | द्रव्याणि | गुणाः | कर्माणि |
|---|---|---|---|
| १. द्रव्यम् | १.पृथिवी | १. रूपम्, | १.उत्क्षेपणम् |
| २. गुणः | २. आपः | २. रसः, | २. अपक्षेपणम् |
| ३. कर्म | ३. तेजः | ३.गन्धः | ३. आकुञ्चनम् |
| ४. सामान्यम् | ४. वायुः | ४. स्पर्शम् | ४. प्रसारणम् |
| ५. विशेषः | ५. आकाशः | ५. शब्दः | ५. गमनम् |
| ६. समवायः | ६. कालः | | |
| ७. अभावः | ७. दिक् | | |
| | ८. आत्मा | | |
| | ९. मनः | | |

**स्वावलोकनप्रश्नाः**

१. वैशेषिकदर्शनस्य प्रणेता कः?

उ.

२. वैशेषिकदर्शने कानि कर्माणि?

उ.

३. महर्षिकणादः किं पुस्तकं लिखितवान्?
उ.

४. कणादमते कति प्रमाणानि भवन्ति?
उ.

५. कणादमते मुख्य प्रतिपाद्यो विषयः कः?
उ.

## १.९. मीमांसकमतम्

प्रिय छात्राः भवन्तः एतावत्पर्यन्तं बोद्ध-न्याय-सांख्य-जैन-वैशेषिकदर्शनानि आलोचितवन्तः। इदानीं आचार्यजैमिनिकृतं मीमांसादर्शनस्य विषये चर्चां करिष्यन्ति। आगच्छन्तु आलोचयामः तावत् किमिदं मीमांसादर्शनम् इति।

मीमांसादर्शनम् आस्तिकं दर्शनम् अस्ति। एतस्य दर्शनस्य प्रणेता आचार्य जैमिनी अस्ति आचार्यजैमिनिना रचितं मीमांसादर्शनम् नाम पुस्तकं मीमांसादर्शनस्य आधारं पुस्तकम् अस्ति। धर्मः मीमांसादर्शनस्य मुख्यप्रतिपाद्यो विषयः अस्ति। धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् इति एतस्मिन् शास्त्रे उक्तम् अस्ति। मीमांसादर्शने सम्प्रदायद्वयम् अस्ति। तत्र एकः भाट्टसम्प्रदायः अपरः प्राभाकरसम्प्रदायः इति। एतदेव भाट्टमतं गुरुमतम् इति पदाभ्यां व्यवहृतं भवति। प्रमेयनिरूपणार्थं मत भेदेन पञ्च तथा षट् प्रमाणानि स्वीकृतानि सन्ति। मीमांसामते ज्ञानं सर्वं यथार्थम् अस्ति। भ्रमज्ञानं ते नाङ्गीकुर्वन्ति। एतन्मते जगन्नित्यम् अनन्तम् अस्ति। अतः जगतः प्रलयः न भवति। अस्मिन् जगति त्रयः पदार्थाः दृश्यन्ते ते च भोगायतनम् भोगसाधनानि, भोग्यविषयाः च। भोगायतनं शरीरम्, भोगसाधनानि इन्द्रियाणि भवन्ति, शेषं यावन्तः, पदार्थाः ते भोग्यविषयाः भवन्ति। एतन्मते आत्मा कर्त्ता, भोक्ता, ज्ञाता नित्यः, सर्वगतः विभु च भवति। आत्मा ज्ञानस्य आश्रयो भवति। उभयमतानुसारेण आत्मा जडद्रव्यवत् भवति इति वर्णितम् अस्ति। देहेन्द्रियादिसम्बन्धस्य योऽत्यन्तसमुच्छेदः सः मोक्ष इति प्राभाकराः वदन्ति। विशुद्धात्मज्ञानेन सुखदुःखयोः योऽत्यन्तसमुच्छेदः सः मोक्षः इति भाट्टाः कथयन्ति।

इमां सारणीं सावधानेन पश्यन्तु ----

**मीमांसामतम्**

भाट्टमतम् | आचार्यजैमिनिः | प्राभाकरमतम्

(मीमांसासूत्राणि) (मीमांसादर्शनम्)

(धर्मः मुख्यप्रतिपाद्यः)

कुमरिलभट्टः

प्रत्यक्षम्, अनुमानम्, उपमानम्-शब्दः
अर्थापत्तिः- अनुपलब्धि षट् प्रमाणानि

विशुद्धत्मज्ञानेन सुखदुःखयोःसमुच्छेदः मोक्षः।

प्रभाकरमिश्रः

प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः
अर्थापत्तिः पञ्च प्रमाणानि।

देहेन्द्रियादि सम्बन्धस्योच्छेदः मोक्षः

**स्वावलोकनप्रश्नाः**

१. मीमांसादर्शनस्य मूलपुस्तकस्य नाम किम्?
उ.

२. मीमांसादर्शनस्य मतद्वयं किम्?
उ.

३. उभयमतेन प्रमाणानि कानि सन्ति?
उ.

४. भोगायतनं किम् अस्ति?
उ.

५. आत्मा कीदृशः अङ्गीकृतः?
उ.

## १.१०. चार्वाकमतम्

प्रिय छात्राः एतावत्पर्यन्तं भवन्तः बौद्ध-न्याय-सांख्य-जैन-वैशेषिक-मीमांसादर्शनानां विषये पठितवन्तः। तत्र मुख्यांशानाम् आलोचनं कृतवन्तः। इदानीं नास्तिकदर्शनस्य चार्वाकमतस्य विषये चिन्तनं करिष्यन्ति। तत्र विद्यमानानां मुख्यांशानाम् आलोचनं करिष्यन्ति। आगच्छन्तु! श्रद्धया चिन्तयामः किमिदं चार्वाकदर्शनम् इति। चार्वाकदर्शनस्य प्रणेता आचार्यवृहस्पतिः अस्ति। एतस्मिन् दर्शने वचनानि चारुणि सुन्दराणि भवन्ति, अतः एतस्य नाम चार्वाकदर्शनम् अस्ति। चार्वाक नाम आचार्यद्वारा कृतम् इदं दर्शनम् इति कारणतः एतस्य दर्शनस्य नाम चार्वाकदर्शनम् इति एतस्य दर्शनस्य अपरं नाम अस्ति तद् भवति लोकायतदर्शनम् इति। जयराशिभट्टद्वारा लिखितं तत्त्वोपालव सिंह नाम पुस्तकम् एतस्य दर्शनस्य मूलपुस्तकम् अस्ति।

चार्वाकमते आत्माविषये विश्वासः न भवति। एतन्मते भौतिकवादे अत्यन्तं श्रद्धा भवति। चार्वाकमते अर्थः कामः च पुरुषार्थौ भवतः। प्रत्यक्षम् एकम् एव प्रमाणम् अस्ति। एतन्मते चत्वारि उपादानानि सन्ति। तानि पृथिवी, जलं, तेजः, वायु इति। एतानि चत्वारि उपादानानि सृष्टिं प्रति कारणानि सन्ति। अतः उक्तम् अस्ति--

**तत्र चत्वारि भूतानि भूमिवार्यनिलानिलाः।**
**चतुर्भ्यः खलु भूतेभ्यः चैतन्यमुपजायते।। इति।**

देह एव आत्मा अस्ति। प्रत्यक्षम् एकम् एव प्रमाणं भवति। एतन्मते सृष्टिः सहजसिद्धा अस्ति यथा अग्नौ उष्णता, जले शीतलता सहजसिद्धा तद्वत् सृष्टि अपि भवति इति। एतस्मिन् सन्दर्भे इदं पद्यं स्मरामः

**शिखिनं चित्रयेत् कोवा कोकिलांश्च प्रकूजयेत्।**
**स्वभावव्यतिरेकेण विद्यते नात्र कारणम्।। इति।।**

मानवः यावत् पर्यन्तं जीवितुमिच्छति तावत्पर्यन्तं सुखेन जीवनं धारयेत्। स्वर्ग-नरक नाम कोऽपि पृथक् लोकः एव नास्ति एतस्मिन् सन्दर्भे एते किं कथितवन्तः इति पठामः ।

**यावज्जीवं सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्।**
**भस्मीभूतस्य देहस्य पुनरागमनं कुतः।। इति।।**

चार्वाकमते निग्रहः अनुग्रहकर्त्ता, प्रजानुरञ्जकः राजा एव ईश्वरो भवति। एते देहात्मवादं स्वीकुर्वन्ति। मरणमेव मोक्ष इति एतस्मिन् दर्शने प्रतिपादितम् अस्ति। एतेषां प्रमुखवचनानि स्मर्तुम् इमां सारणीं ध्यानेन पठन्तु --

**चार्वाकसिद्धान्तः**

१. चार्वाकदर्शनस्य प्रणेत---आचार्यबृहस्पतिः

२. एतन्मते अङ्गीकृतानि उपादानानि---पृथिवी, आपः, तेजः, वायुः

३. प्रमाणम्---- प्रत्यक्षम् एकम् एव

४. सृष्टिः --- स्वाभाविकी
५. आत्मा----देहः एव आत्मा
६. राजा--- लोकानुरञ्जकः राजा
७. पुरुषार्थः--- अर्थः, कामः च।
८. मोक्षः ---- मरणम् एव मोक्षः
१.१०.२. भवन्तः चार्वाकदर्शनस्य सक्षिप्तपरिचयं पठितवन्तः। कृपया एतेषां प्रश्नानाम् उत्तराणि लिखन्तु
१. चार्वाकमते पुनर्जन्म अस्ति वा?
२. चार्वाकदर्शने सृष्टि कारणानि कानि?
३. एतन्मते आत्मा कीदृशः?
४. जीवनं कथं यापयेत्?
१.११ आदर्शप्रश्नाः--
कृपया एकेन पदेन उत्तराणि लिखन्तु।
१. भारतीयदर्शनम् कति विधम् अस्ति ?
२. आस्तिकदर्शने कस्य प्रामाण्यम् अस्ति?
३. आस्तिकदर्शनानि कति सन्ति?
४. दर्शनम् इति पदस्य अर्थः कः?
५. षड्दर्शनसमुच्चयग्रन्थकारः कः?
६. बौद्धमतेन कति आर्यसत्यानि सन्ति?
७. बौद्धमतं कतिधा विभक्तम् अस्ति?
८. बौद्धमतस्य आद्यः आचार्यः कः?
९. न्यायमते कति प्रमेयाः सन्ति?
१०. न्यायदर्शनस्य मुख्यप्रतिपाद्यो विषयः कः?
११. सांख्यदर्शनम् इति पुस्तकं कः लिखितवान्?
१२. सांख्यमते तत्त्वानां संख्या कति भवन्ति?
१३. सांख्यदर्शने सृष्टेः उपादानं किम्?
१४. सांख्यमते चेतनतत्त्वस्य नाम किम्?
१५. जैनदर्शने कतिपदार्थाः सन्ति?
१६. अर्हत् पदवाच्यः कः?
१७. जीवः कतिविधः?

१८. जैननये ज्ञानं कतिविधम्?
१९. जैनमतस्य प्रवर्तकः आचार्यः कः?
२०. वैशेषिकदर्शनम् इति नामकरणे कारणं किम्?
२१. वैशेषिकमते कति पदार्थाः सन्ति?
२२. वैशेषिकमते ज्ञानस्य आश्रयः किम्?
२३. मीमांसादर्शने कति प्रमाणानि भवन्ति?
२४. मीमांसादर्शने कति सम्प्रदायाः सन्ति?
२५. गुरुमतस्य प्रवर्त्तकः कः?
२६. मीमांसादर्शनस्य मुख्य प्रतिपाद्यो विषयः कः?
२७. मीमांसामते भोगायतनम् किम् अस्ति?
२८. मीमांसादर्शनस्य आधारः ग्रन्थः कः?
२९. भोगसाधनानि कानि?
३०. चार्वाकदर्शनस्य प्रवर्तकः आचार्यः कः?
३१. चार्वाकमते उपादानानि कानि?
३२. चार्वाकमते आत्मा किम्?
३३. चार्वाकमते पुरुषार्थः कः?
३४. एतन्मते मोक्ष इत्युक्ते किम्?
३५. चार्वाकमते ईश्वरः कः?

१.१२. सन्दर्भग्रन्थाः--


१. सर्वदर्शनसंग्रहः (माधवाचार्य प्रणीतम्)
२. सर्वदर्शन संग्रहः -प्रो० उमाकान्त ऋषि।

# द्वितीयः पाठः (अथबौद्धमतम्)

संरचना


२.१.प्रस्तावना

२.२.उद्धेश्यम्

२.२.१.आर्यसत्यानि

२.२.२.पञ्चस्कन्धाः

२.२.३.दुःखसमुदयः

२.२.४.प्रतीत्यसमुत्पादचक्रम्

२.२.५.दुःखनिरोध

२.२.६.त्रिरत्नसारणी

२.३.द्वादशायतनानि

२.३.१.रेखाचित्रम्

२.४.प्रत्यक्षम्

२.४.१.अनुमानम्

२.४.२.रेखाचित्रम्

२.४.३.आदर्शप्रश्नाः

२.४.४.सन्दर्भग्रन्थाः


## २.१.प्रस्तावना

प्रिय छात्राः। भवन्तः एतावत्पर्यन्तं बौद्ध–न्याय–सांख्य–जैन–कणाद–मीमांसा तथा चार्वाकदर्शनस्य सक्षिप्तपरिचयं पठितवन्तः। तत्र विद्यमानानां प्रमेयानां परिचयं प्राप्तवन्तः। इदानीं हरिभद्रसूरि महोदयेन लिखितस्य षड्दर्शनसमुच्चयग्रन्थस्य क्रमशः पठनं तत्रत्य विषयाणां च आलोचनं करिष्यन्ति। आचार्य हरिभद्रसूरिः जैनसम्प्रदायस्य आचार्यः अस्ति। एषः षड्दर्शनसम्मुचयः। नाम ग्रन्थं लिखितवान् एतस्मिन् ग्रन्थे बौद्धदर्शनम्, न्यायवैशेषिकदर्शनम्, सांख्यदर्शनम्, जैनदर्शनम्, मीमांसादर्शनम् चार्वाकदर्शनम् इति एतेषां चर्चा कृता अस्ति। अत्र न्यायवैशेषिकं सांख्यम् मीमांसा इति त्रिणी आस्तिकदर्शनानि सन्ति। बौद्धजैनचार्वाक इति त्रीणी नास्तिकदर्शनानि सन्ति। एतेषां दर्शनानां लक्ष्यम् एकमेव। तद्भवति सुखप्राप्तिः दुःखनिवृत्तिश्च। परन्तु दर्शनानि विविधेषु उपायेषु स्वस्व मतानि वर्णयन्ति। आगच्छन्तु पठामः ग्रन्थस्यारम्भे मङ्गलाचरणस्य प्रयोजनम् किम्? इति।

शुभकर्मणाम् आरम्भे इष्टदेवतानां स्मरणम् अस्माकं भारतीयपरम्परायाम् अस्ति। अतः ग्रन्यकारः हरिभद्रसूरिः सम्प्रदायस्य अधिष्ठातारं महावीरं जिनं नमस्कृतवान्। एवं करणेन ग्रन्थस्य निर्विध्नेन परिसमाप्तिः भविष्यति इति भारतीयं चिन्तनम्। शिष्टाचाररक्षणाय इष्टदेवस्य स्मरणं करणीयम् इति अस्माकं चिन्तनं

जिज्ञासूनां शिष्याणां कल्याणाय च इष्टदेवस्य स्मरणं कर्तव्यम् इति शास्त्रेषु वर्णितम्। एतत् त्रिविधं प्रयोजनं मनसि कृत्वा हरिभद्रसूरिः जैनाभिमतस्य देवस्य नमकारं कृत्वा ग्रन्थरचनां कृतवान्। कृपया एतेषां प्रश्नानामुत्तराणि लिखन्तु।

**१.१.२.**

१. भवतां गृहे विनायकस्य पूजा कस्मिन् सन्दर्थे भवति?

२. किमर्थं वयम् इष्टदेवस्य पूजनं कुर्मः?

३. मङ्गलाचरणस्य त्रिणी प्रयोजनानि कानि?

प्रिय पाठकाः हरिभद्रसूरि महोदयः देवताभेदम् आधारीकृत्य षण्णां दर्शनानां वर्णनं षड्दर्शनसमुच्चयपुस्तके कृतवान्। तानि च षड्दर्शनानि इमानि सन्ति।

बौद्धं नैय्यायिकं सांख्यं जैनं वैशेषिकं तथा।
जैमिनीयं च नामानि दर्शनानममून्युहो।। इति ।

एतेषां षड्दर्शनानां वर्णनक्रमे आदौ बौद्धदर्शनस्य वर्णनं ग्रन्थकारेण कृतम् अस्ति। तत्र बौद्धदर्शने प्राधान्येन आर्यसत्यचतुष्टयम्। द्वादश-आयतनानि, प्रत्यक्षमनुमानमिति प्रमाणद्वयस्य चर्चा कृता अस्ति। आगच्छन्तु आलोचयामः किमिदम् आर्यसत्य चतुष्टयम् इति। कृपया सावधानेन अमुम् अनुच्छेदं पठन्तु।

१.२. प्रिय छात्राः गौतमबुद्धः एक उत्तमः उपदेशकः समाजसंस्कारकः सम्बर्धितदार्शनिकः च आसीत्। बौद्धमतस्य आधारभूतम् पीटकत्रयम् आसीत्। तच्च विनयपीटकम् २ सूत्तपीटकम् ३. अधिधम्मपीटकम् इति नामभिः प्रसिद्धम् आसीत्। विनयपिटके बौद्धधर्मस्य नियमानाम्, बौद्धसन्यासीनां आचरणविधीनां विषये चर्चा कृता अस्ति। सूत्तपिटके बुद्धदेवेन दत्तानामुपदेशानां वर्णनं कृतम् अस्ति। अभिधम्म पिटके दार्शनिक तत्त्वानाम् आलोचनं कृतम् अस्ति। बौद्धदर्शनस्य मूलाधाररूपेण अभिधम्मपिटकं भवति।

संसारे सर्वोऽपि मानवः सुखम् इच्छति। दुःखं न कदाचिदपि वाञ्छति। सर्वान् जनान् दुःखमुक्तं कर्तुं दर्शनम् प्रकृष्टं साधनम् अस्ति। गौतमबुद्धः मानवान् दुःखमुक्तं कारयितुम् चतुर्णाम् आर्यसत्यानाम् आलोचनं कृतवान्। तानि च चत्वारि आर्यसत्यानि एवं भूतानि भवन्ति।

१. दुःखम् – जीवनं दुःखमयम्

२. दुःखसमूदयः – दुःखस्य किमपि कारणम् अवश्यम् अस्ति।

३. दुःखनिरोधः – दुःखस्य निवर्तनं कर्तुं शक्यम् अस्ति।

४. दुःखनिरोधोपायाः च – दुःखनिवृत्तेः उपायाः सन्ति।

तत्र किं नाम आर्यसत्यम्? इत्यस्य उत्तरं ग्रन्थकारः एवं कथयति साधुपदार्थानां मुक्तिकारणत्वेन यथावस्थित हितचिन्तनम् सत्यम् इति कथ्यते। आर्याणाम् विदुषां सत्यम् आर्य सत्यम्। तेषाम् आर्यसत्यानाम् इति व्युत्पत्तिः। येषां सत्यानां युक्तायुक्तपरीक्षणद्वारा दुःखसमुच्छेदो भवति निखिलस्यापि लोकस्य कल्याणं भवति तत् आर्यसत्यम् इत्यर्थः। तत्र चतुर्षु आर्यसत्येषु प्रथमम् अस्ति दुःखम्।

१.२.१ कृपया अधोलिखितानां प्रश्नानामुत्तराणि लिखन्तु।

१. दुःखात् मुक्तये किं प्रकृष्टं साधनम् अस्ति?

२. चत्वारि आर्यसत्यानि कानि सन्ति?

३. पिटकत्रयस्य नाम किम् अस्ति?

४. बौद्धदर्शनस्य आधारभूतं पिटकं किम् अस्ति?

५. आर्यः इति पदस्य कः अर्थः उक्तः?

१.२.२. दुःखं नाम प्रतिकुलानुभवः ज्ञानं वा भवति। आचार्य हरिभद्रसूरिः संसारिजनस्य कृते स्कन्धाः दुःखं भवति इति वर्णयति। संसारे ये संचरणं कुर्वन्ति ते संसारिणः, अर्थात् जनन-मरण-परम्पराजाले बद्धाः भवन्ति। विस्तरणशीलाः अपक्षयधर्मयुक्ताः स्कन्धो भवति। एषः स्कन्ध एव संसारिजनस्य दुःखम् इति कथ्यते। प्रथम आर्यसत्यानुसारेण संसारः दुःखमय अस्ति। संसारे यावन्तपदार्थाः सन्ति सर्वे अनित्य नाशधर्मयुक्ताः च भवन्ति। अतः संसारः दुःखमयः इति। भौतिकं सुखं दुःखसम्पृक्तं युक्तं भवति अतः तदपि दुःखं भवति। अभीष्टवस्तुप्राप्तये यः प्रयत्नः भवति तत्र दुःखम् अस्ति, प्राप्तस्य यदानाशो भवति तत्रापि दुःखम् अस्ति। इदं दुःखं मानसं भवति, शारीरिकं च भवति। कामः क्रोधः, लोभः, मोहः, शोकः एते मानसदुःखे अन्तर्भवन्ति। जन्म-जरा-रोगः-मरणम् एते शारीरिकदुःखे अन्तर्भवन्ति। लोके अप्रियस्य संयोगः दुःखं भवति। प्रियस्य वियोग अपि दुःखं भवति, स्वार्थः, हिंसनम्, संघर्षः, एतत्सर्वं दुःखं भवति रूप-वेदना-संज्ञा-संस्कारः विज्ञानम् इति एते पञ्चस्कन्धाः अपि दुःखं जनयन्ति। एकेन वाक्येन यदि कथयामः तर्हि जन्मतः आरभ्य मरणपर्यन्तं समग्रं जीवनमेव दुःखम् भवति। पञ्चस्कन्धानां नामानि अत्र पठामः --- विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च।।

तत्र विज्ञानं नाम विशिष्टं ज्ञानम्। सर्वं ज्ञानं क्षणिकम् इति विषये यत् ज्ञानं भवति तत् विज्ञानं सत्तायुक्तं भवति पदार्थाः घट पटादयः कल्पिताः भवन्ति। परन्तु विज्ञानपदेन वौद्धाः मनः इति वर्णयन्ति। ज्ञानम् इत्यपि कथयन्ति।

वेदना नाम---पूर्वकृत पुण्यपापबलेन पदार्थसम्बन्धेन च जीवेन अनुभूयमानं सुखदुःखादिकं भवति। संज्ञानाम नाममात्रम् इति। अर्थात् चेतनाचेतनरूपः प्रपञ्चः नाममात्रम् सांसारिकं सर्वमपि व्यवहारतत्त्वं नाम मात्रम् अस्ति। अत्र परमार्थ कोऽपि न भवति। पुत्र--कलत्र--मित्रदि सम्बन्धः घटपटादयः यावन्तो पदार्थाः सन्ति ते सर्वेऽपि संज्ञामात्रम् इति।

तत्र संस्कारो नाम---संस्क्रियते अनेन इति संस्कारः। स्मृतिजन्यं ज्ञानं संस्कार इति। रूप-संज्ञादिनां स्मृतिः

या मनसि स्थिरा भवति। तत् स्मृति द्वारा यदा कस्यचित् वस्तुनः परिचयः लभ्यते अथवा पूर्वं अनुभवकारणात् वस्तुविषयकं ज्ञानं भवति सः संस्कार इति कथ्यते। अतः एव पूर्वानुभवबलेन स एव अयं रामः यः पूर्वं चेन्नैईनगरे दृष्टः, सा एव इयं स्त्री या मुम्बई नगरे दृष्टा इदानीं तिरुमलदेवस्थाने पश्यामि इति अर्थात् पूर्वानुभवबलेन स्मृतिबलेन वा ज्ञातुः यत् ज्ञानम् उत्पद्यते तत् संस्कारो भवति। ज्ञानसंस्कारः, वस्तुसंस्कारः, एवम्भूताः संस्काराः अस्माकं व्यवहारे आगच्छन्ति। गुणस्य आधानेन दोषस्य अपनयनेन अपि संस्कारः भवति। एतस्मिन् सन्दर्भे इदं पद्यं पठामः--

**यस्मिन्नेव हि सन्तान आहिता कर्मवासना।**
**फलं तत्रैव सन्धत्ते कार्पासे रक्तता यथा।। इति।।**

तत्र रूपं नाम भूत परमाणूनां समूहः पृथिवी, जलं, वायुः अग्निः इत्येतानि चत्वारिमहाभूतानि अपि रूपपदेन बोध्यानि भवन्ति।

एते एव पञ्च उपादानस्कन्धाः भवन्ति ये कामनां तृष्णां वा जनयन्ति ततः दुःखजनकाश्च भवन्ति। एतदेव बौद्धमतस्य प्रथमम् आर्यसत्यं भवति। एतद् ज्ञात्वा तस्य निवारणं करोति सः सुखी भवति। दुःखं प्रति कानि कारणानि सन्ति इति सन्दर्भे सावधानेन इमां सारणीम् अवलोकयन्तु।

दुःखकारणम्

१.२.१. पञ्चस्कन्धाः १. विज्ञानस्कन्धः २. वेदनारकन्धाः, ३. संज्ञास्कन्धः ४. संस्कारस्कन्धः, ५. रूपस्कन्धः।

१. अभिष्टस्य अप्राप्तिः २. प्राप्तस्य नाशः ३. प्रियस्य वियोगः ४. अप्रियस्यसंयोगः

१.स्वार्थम् २.हिंसनम् ३. संघर्षः

एतानि दुःखकारणानि लोके।

दुःखम्

प्रतिकुलवेदनम् अनुभव वा -- १.शारीरम् २.जन्म ३.जरा ४.व्याधि ५. मरणम्

प्रतिकुलवेदनम् अनुभव वा --- १. मानसम् २. कामः ३. क्रोधः, ४. लोभः ५.मोहः ६.शोकः

संसारः दुःखमयः

१.२.२. भवन्तः एतावत् पर्यन्तं दुःखं नाम प्रथमम् आर्यसत्यं पठितवन्तः। तत्र दुःखस्य विविधतां, कारणं, स्वरूपं च आलोचितवन्तः। कृपया अधोलिखितानां प्रश्नानामुत्तराणि स्वमतानुसारेण लिखन्तु।

१. पञ्चस्कन्धाः के?

२. दुःखं कति विधम्?

३. मानसानि दुःखानि कानि?

४. लोकमतानुसारं किमपि दुःखकारणद्वयं लिखत?

१.२.३. प्रिय जिज्ञासवः छात्राः। भवन्तः सम्प्रति एतस्मिन् अनुच्छेदे द्वितीयम् आर्यसत्यम् आलोचयिष्यन्ति। द्वितीयम् आर्यसत्यम् अस्ति दुःखसमुदय इति। दुःखसमुदयः इति पदस्य दुःखस्य उत्पत्तिः इति अर्थो भवति। यस्य उत्पत्तिः भवति तस्य कार्यं इति व्यवहारः उदाहरणार्थम्-घटः कार्यम् अस्ति। पटः कार्यम् एवं लोके बहुनि कार्याणि भवन्ति। प्रत्येकस्य अपि कार्यस्य कारणं निश्चयेन भवति। सर्वदा कारणाधीनां कार्यं भवति। कार्यकारणयोः मध्ये कश्चित् नियतसम्बन्धः तिष्ठति। अयं सम्बन्धः यदा अनुकुलः प्रीतिरूपो भवति तदा अयम् आत्मीयः इति व्यवहरामः। एष एव सम्बन्ध यदा प्रतिकुलः द्वेषरूपो भवति तदा एषः परः अथवा परकीय इति व्यवहरामः। एवञ्च रागात् भवतु द्वेषकारणात् वा भवतु एतदुभयमपि दुःखं रूप कार्यं प्रति कारणं भवति।

बौद्धमतानुसारेण प्रतीत्यसमुत्पादचक्रम् एव दुःखकारणम् निर्णीतम् अस्ति। एतस्य दुःखस्य जननी अविद्या अस्ति। अविद्या कारणतः मनसि विषय विषये कामना तृष्णा वा जायते, कामना कारणेन संसारे अनुरागो भवति। अनुरागकारणेन जीव एतस्मिन् संसारचक्रे पुनः पुनः भ्रमति।

प्रतीत्यसमुत्पादचक्रस्य द्वादशाङ्गानि भवन्ति। तानि अङ्गानि कानि इति आगच्छन्तु अत्र ध्यानेन पश्यामः।

१.२.४. प्रतीत्यसमुत्पादचक्रम् -- १.अविद्या २. संस्कारः ३. विज्ञानम् ४. नामरूपे ५. षडायतनम् ६. स्पराः

७. वेदना ८. तृष्णा ९. उपादानम् १०. भव ११ जाति १२. जरा मरणे १३. भूतजीवनम् १४. वर्तमान जीवनम् १५. भविष्यत जीवनम्

१.२.५ अत्र कानिचित् कार्याणि लिखितानि सन्ति। कृपया एतानि पठन्तु तेषां कारणानि भवन्ति इति लिखन्तु।

१. दधि २. वस्त्रम् ३. इष्टकानि ४. सुवर्णहारः ५. रज्जुः ६. नुपूरम् ७. अन्नम्, ओदनम् ८. नारिकेल तैलम् ९. सर्षपतैलम्

१.२.६. प्रिय छात्राः इदानीं भवन्तः तृतीयमार्यसत्यम् आलोचयिष्यन्ति। तृतीयस्य आर्यसत्यस्य नाम अस्ति दुःखनिरोधः इति। दुःखनिरोधः इति पदस्य अर्थः अस्ति दुःखस्य विनाशः, अन्तः, समाप्तिः वा। पूर्वं भवन्तः पठितवन्तः दुःखस्य कारणं द्वादशाङ्गयुक्तं प्रतीत्यसमुत्पादचक्रम् अर्थात् भवचक्रम् इति। दुःखस्य जननी अविद्या या सकलकामनानां कारणीभूता अस्ति इति आलोचितवन्तः। अत्र दुःखकारणम् अविद्या अस्ति। तस्याः अविद्यायाः यदा नाशः अन्तः भवति तदा दुःखस्य अपि नाशः अवश्यं भविष्यति। एवञ्च कारणरूपायाः अविद्यायाः नाशः एव दुःखनिरोध भवति। कामनायाः सर्वात्मना नाशः यदा भवति तदा जीवस्य संसारविषये अनासक्ति भवति। ततः दुःखस्य त्रैकालिकी निवृत्तिः सम्भवति। एषः दुःखनिरोध एव निर्वाणम् इति कथ्यते। एतस्य एव अमृतम् इति पदेन व्यवहारः भवति। एषः दुःखनिरोधः बौद्धदर्शनस्य सर्वस्वं भवति। अतः एव

तथागत बुद्धदेव तस्य हृदयस्थं वचनम् एवम् उक्तवान्--

कामनायाः विनाशे दुःखस्य विनाशः इति

१.२.७. चतुर्थस्य आर्यसत्यस्य नाम अस्ति दुःखनिरोधोपायः इति। दुःखस्य नाशाय के मार्गाः अवलम्बनीयाः भवन्ति इति विषये अत्र चर्चा कृता अस्ति। दुःखतः निवृत्त्यर्थम् मार्गद्वयम् अस्ति ।तत्र प्रथमः नैतिकमार्गः, द्वितीय आध्यात्मिकसाधनमार्गः इति। परन्तु आर्याः दुःखनिवृत्तिविषये अष्टौ मार्गान् उपदिष्टवन्तः। सः एव अष्टाङ्गिकमार्ग इति कथ्यते। एषः अष्टाङ्गिक मार्गः चतुर्थ आर्यसत्यस्य अभिन्नः अङ्गो भवति। ते च अष्टाङ्गमार्गाः एवं भूताः सन्ति--

१. सम्यक् दृष्टिः---- आर्यसत्यानां ज्ञानम्, बुद्धवचने श्रुद्धा च

२. सम्यक् सङ्कल्पः --- आर्यसत्यानुसारेण जीवन निर्वहणाय इच्छा।

३. सम्यक् वाक् / वाणी---- सत्यवचनम्

४. सम्यक् कर्म --- हिंसा राग- द्वेषादीनां त्यागेन सह सत्कर्माचरणम्

५. सम्यक् जीविका --- सन्मार्गेण धनोपार्जनम्

६. सम्यक् प्रयत्नः---- दुष्टभावनानां त्यागः सद्भावानां ग्रहणोचित प्रयासः

७.समेयक् स्मृतिः - युक्तायुक्तपरीक्षणेन सह भावनायाः चित्तस्य च एकाग्रता सम्पादनम्।

८. सम्यक् समाधिः इति --- चित्तस्य एकाग्रताद्वारा निर्विकल्पप्रज्ञायाः अनुभवः। एतदतिरिक्ततया साक्षात् बुद्धेन उपदिष्टं त्रिरत्नं दुःखनिरोधमार्ग इति वर्णितम् अस्ति। तत् रत्नत्रयम्--शीलं, प्रज्ञा, समाधि च भवति। एतानि त्रीणिरत्नानि एतेषु अष्टाङ्गेषु एव अन्तर्भवन्ति। तत् अत्र सावधानेन पश्यन्तु---

त्रिरत्नम्-अष्टाङ्गिकमार्गः

१.२.८.

१) ज्ञानरत्नम् १. सम्यक् दृष्टिः २. सम्यक् सङ्कल्पः

२) शीलरत्नम् १. सम्यक् वाणी २. सम्यक् कर्म ३. सम्यक् जीविका

३) समाधिरत्नम् १. सम्यक् प्रयत्नः २. सम्यक् स्मृतिः ३. सम्यक् समाधिः

१.३

प्रिय छात्राः ! एतावत् पर्यन्तं बौद्धदर्शनस्य सर्वतन्त्रस्वतन्त्रस्य आर्यसत्य नाम सिद्धान्तस्य विषये चर्चां कृतवन्तः। तत्र दुःखं नाम किम्? तत् कतिविधम्, दुःखस्य उत्पत्तौ कारणं किम्?, दुःखस्य विनाशः, दुःखविनाशाय के उपायाः इत्यादीनां विषयाणां सम्यक् आलोचनं कृतवन्तः। इदानीं ग्रन्थकारेण कृतं द्वादशायतनविचारं करिष्यन्ति। तत्र द्वादश आयतनं नाम पञ्चज्ञानेन्द्रियाणि, पञ्चेन्द्रियाणां शब्दस्पर्शादयः विषयाः, चित्तम्, धर्मः इति एतानि द्वादश आयतनानि भवन्ति। एतैः द्वादशायतनैः युक्तः जीवः सांसारिकं सुखदुःखादिकम् अनुभवति, शरीरम् एतेषां गृहं भवति। एतानि शरीरमाश्रित्य तिष्ठन्ति ततः स्व स्व कार्याणि कुर्वन्ति। बौद्धमते भवचक्रे निर्दिष्टानि तत्त्वानि अपि द्वादश आयतनानि भवन्ति। एतदुभयविधस्य आयतनस्य चर्चा बौद्ध दर्शने कृता वर्तते। एतदुभयविधम् अपि आयतनं दुःखस्य जनने कारणं भवति। अतः द्वादश

आयतनानां ज्ञानम् आवश्यकम् अस्ति। एतानि सर्वाण्यपि आयतनानि क्षणिकानि भवन्ति इति बौद्धानामाशयः। आयतनम् इति पदस्य भोगायतनं शरीरम् इति अर्थः अत्र ग्रहीतुम् उचितं भवति। द्वादशायतनानां सन्दर्भे इदं पद्यम् अत्र पठामः--

**पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्चमानसम्।**
**धर्मायतनमेतानि द्वादशायतनानि च।। इति।।**

द्वादशायतनानां विषये इमां सारणीं पश्यन्तु।

१.३.१ द्वादशायतनानि--पञ्चज्ञानेन्द्रियाणि १.श्रोत्रम् २. चक्षुः ३. त्वक् ४. रसना ५. घ्राणम्

१.३.१ द्वादशायतनानि -- विषयाः १.शब्दः २.रूपम् ३. स्पर्शः ४. रसः ५. गन्धः ६. चित्तम् ७. धर्मः

१.३.२. कृपया अधो लिखितानां प्रश्नानाम् उत्तराणि लिखन्तु।

१. पञ्चज्ञानेन्द्रियाणि कानि?

२. रसः कस्य इन्द्रियस्य विषय अस्ति।?

३. आयतनम् इति शब्दस्यार्थः किम्?

१.४. प्रिय जिज्ञासवः छात्राः ! एतावत् पर्यन्तं बौद्धदर्शनमतानुसारेण आर्यसत्य चतुष्टयम्, द्वादशायतनानां विषये चर्चां कृतवन्तः। तत्रत्यान् विषयान् आलोचितवन्तः। इदानीं बौद्धमतानुसारेण प्रमाणविषये पण्डित हरिभद्रसूरिः किं कथयति इति विषये आलोचनं करिष्यन्ति। एतस्मिन् अनुच्छेदे किं नाम प्रमाणम्, प्रमाणं कति विधम्, प्रमाणस्वरूपम्, उदाहरणम्, प्रमाणस्य आवश्यकता च का? इत्येतेषां विषयाणां विचारण करिष्यन्ति। आगच्छन्तु पठामः तावत् किम् इदं प्रमाणम् इति।

तत्र प्रमाकरणं प्रमाणं भवति। प्रमा नाम सम्यक् ज्ञानम्। सम्यक् ज्ञानं प्रति यत् करणं साधनं भवति तत् प्रमाणम् इति अर्थः। ज्ञानं द्विविधम् अस्ति। एकं प्रमात्मकम्, अपरं भ्रमात्मकम् इति। सम्यक् ज्ञानेन मिथ्याज्ञानस्य निराकरणं भवति। सम्यक् ज्ञानस्य साधनानि प्रमाणानि भवन्ति। इदं प्रमाणं प्रमेयाणां विषयाणां निरूपणे सहायकं भवति। अतः शास्त्रकाराः एवं कथयन्ति मानाधीना मेयसिद्धिः इति। बौद्धमतानुसारेण प्रत्यक्षम्, अनुमानम् इति प्रमाणद्वयं भवति। एतस्मिन् सन्दर्भे ग्रन्थकारः इदं पद्यं लिखति--

**प्रमाणेद्वे च विज्ञेये तथा सौगतदर्शने।**
**प्रत्यक्षमनुमानं च सम्यग्ज्ञानं द्विधा यतः।। इति।**

तत्र प्रत्यक्षं नाम चक्षुरिन्द्रियद्वारा उत्पन्नं ज्ञानम्। यथा--इदं भवनम् इदं रेलयानम्, इदं चित्रम्, इत्येवम्भूतं ज्ञानं प्रत्यक्षं ज्ञानं भवति। एतादृशं ज्ञानं चक्षुद्वारा सम्भवति। अतः विद्वांसः कथयन्ति---अक्षम् अक्षं प्रति गतं प्रत्यक्षम्- ऐन्द्रियिकम् इति। एतस्य प्रत्यक्षप्रमाणस्य स्वरूपम् एवमस्ति कल्पनाऽपोढम् अभ्रान्तम् इति। तत्र कल्पना

शब्दादि विषयसम्बन्धं विना जायमानं ज्ञानम्। कल्पना अपोढं नाम निर्विषयकं निर्विकल्पकं वा ज्ञानम्। अभ्रान्तम् भ्रमरहितं यत् निर्विकल्पकं ज्ञानं तत् प्रत्यक्षम् इति अर्थः। बौद्धमते समस्तकल्पनारहितं सम्यग्ज्ञानं प्रत्यक्षं भवति। साररूपेण प्रत्यक्षविषये एवं वक्तुं शक्यते--यत् ज्ञानं कल्पनारहितम्। नामजाति-आदिना असम्बन्धं, भ्रमज्ञानस्पर्शहीनम् अपरोक्षं च भवति तत् प्रत्यक्षम् अस्तीति। एतस्मिन् सन्दर्भे इदं पद्यं स्मरामः--

**प्रत्यक्षं कल्पनाऽपोढं नामजात्याद्यसंयुतम्।**
**अभ्रान्तमपरोक्षं च प्रत्यक्षेणैव सिद्ध्यति।। इति।।**

एवञ्च प्रत्यक्षं निर्विकल्पकम् अभ्रान्तं च भवति। बौद्धमते सविकल्पकं प्रत्यक्षं नाङ्गीकृतम्। घटपटादि सविशेषज्ञानं तु अनादिकालतः विद्यमान वासनाकारणतः व्यवहारे आभासते इति बौद्धाः प्रतिपादयन्ति।

१.४.१. कृपया एतेषां प्रश्नानाम् उत्तराणि लिखन्तु---

१. किं नाम प्रमाणम्?

२. ज्ञानं कति विधं किं च तत्?

३. प्रत्यक्षम् इति पदस्य विश्लेषणं कथम्?

४. प्रत्यक्षस्य स्वरूपं किम्?

१.४.२ इदानीम् अनुमान प्रमाणम् आलोचयामः। अनु नाम पश्चात् अनन्तरम्, मानं नाम ज्ञानम्। प्रत्यक्षम् अनु पश्चात् जायमानं ज्ञानम् अनुमानम् इति अनुमानपदस्य सामान्यमर्थः। अनुमीयते अनेन इति अनुमानम्। ग्रन्थकारमतानुसारेण अनुमानस्य स्वरूपम् एवम् अस्ति---

**रूपाणि पक्षधर्मत्वं सपक्षे विद्यमानता।**
**विपक्षे नास्तिता हेतोरेवं त्रीणि विभाव्यन्ताम्।। इति।**

अर्थात् अनुमानं प्रति यः हेतुः तस्य रूपत्रयं भवति। तद्यथा--पक्षधर्मता इति एकं रूपम्, सपक्षसत्वम् इति द्वितीयं रूपम् विषक्षासत्वम् इति तृतीयं रूपम्। एतत् त्रिरूपात्मकलिङ्गबलेन अनुमान प्रमाणं सिद्ध्यति। हेतोः एतत् रूपत्रयस्य नाम व्याप्तिः भवति। व्याप्तिः नाम कश्चन अविनाभावः विलक्षणः नियमः। एषः नियमः अनुमानस्य हृदयतुल्यं भवति। यस्मिन् स्थाने साध्यम् आश्रित्य तिष्ठति तत् स्थानं पक्षो भवति। यथा पर्वतो वह्निमान् इति सन्दर्भे वह्निः साध्यम् अस्ति। सा वह्निः पर्वतम् आश्रित्य तिष्ठति। अतः पर्वतः पक्षः अस्ति। वह्निधर्मयुक्तः पर्वतः पक्षधर्मता भवति। द्वितीयं लिङ्गरूपम् अस्ति सपक्षसत्वम् अर्थात् साध्यं,हेतुः इति पदार्थद्वयस्य नियमेन एकस्मिन् यथा पाकशाला। अतः पाकशाला अत्र सपक्षसत्त्वं। पाकशालायां धूमकारमात् वह्निः अस्ति इति विपक्षे असत्त्वं इति। यत्र स्थाने साध्यं वह्निः नास्ति तत्र हेतुः धूमोऽपि न

भवति इति एतद्विषयकविचारः। यत्र वह्निः नास्ति तत्र धूमोऽपि नास्ति यथा–––जलाशयः। विपक्षे जलाशये साध्यस्य हेतोः च अभावः विपक्षासत्त्वम् इति पदस्यार्थः। एवं बौद्धमतानुसारेण हेतोः त्रीणि रूपाणि भवन्ति। बौद्धमतानुसारेण ज्ञानमीमांसा प्रकारं परिशीलयन्तु।

१.४.३

## ज्ञानमीमांसा

**ज्ञानम्**

सम्यक् ज्ञानम्      भ्रमज्ञानम्

प्रमा

प्रमासाधनम्–प्रमाणम्

प्रत्यक्षम् (एन्द्रियिकम्)      अनुमानम् (लैङ्गिकम्)

१.४.४

कृपया अधोलिखितानां प्रश्नानाम् उत्तराणि लिखन्तु।

१. अनुमानम् इति पदस्य अर्थः कः?

२. भवान् कस्मिन् विषये अनुमानं करोति?

३. अनुमानलिङ्गस्य त्रीणिरूपाणि कानि?

१.४.५ आदर्श प्रश्नाः––

१. कार्यस्य आरम्भे भारतीयाः किं कुर्वन्ति?

२. षड्दर्शनसमुच्चयस्य ग्रन्थकार ग्रन्थलेखनात् पूर्वं किं लिखितवान्?

३. मङ्गलाचरणस्य प्रयोजनानि कानि?

४. बौद्धदर्शने त्रीणि पिटकानि कानि?
५. बौद्धदार्शनिक सिद्धान्तानाम् आधारभूतः ग्रन्थः कः?
६. संसारे जनाः किम् इच्छन्ति? किं च न इच्छन्ति?
७. तथागतबुद्धस्य दयवाणी का आसीत्?
८. बौद्धदर्शने कानि आर्यसत्यानि भवन्ति?
९. आर्यसत्यम् इत्यस्य नामकरणं कथम्?
१०. दुःखात् मुक्त्यर्थं प्रमुखं साधनं किम्?
११. किं नाम दुःखं भवति?
१२. दुःख भेदाः के भवन्ति?
१३. दुःखकारणानि कानि भवन्ति?
१४. शारीरदुःखानि कानि ?
१५. के पञ्चस्कन्धाः भवन्ति?
१६. मानसानि दुःखानि कानि सन्ति?
१७. का नाम संज्ञा भवति?
१८. निखिलस्यापि दुःखस्य कारणं किम्?
१९. किमपि कार्यद्वयं तस्य कारणद्वयं च उल्लिखत?
२०. वर्तमान जीवनान्तर्गतानि आयतनानि कानि सन्ति?
२१. दुःखनिरोधस्य कारणं किम्?
२२. दुःखनिरोधस्य उपायाः के?
२३. कानि त्रीणि रत्नानि?
२४. का सम्यक् दृष्टिर्भवति?
२५. किं नाम सम्यक् कर्म?
२६. आयतनम् इति पदस्यार्थः कः?
२७. द्वादश आयतनानि कानि?
२८. पञ्चज्ञानेन्द्रियाणि कानि?
२९. ज्ञानेन्द्रियाणां विषयाः के?
३०. प्रमाणम् इति पदस्य व्युत्पत्तिः का?
३१. प्रमाणानि कानि?
३२. प्रत्यक्ष प्रमाणस्य स्वरूपं किम्?
३३. प्रत्यक्ष प्रमाणस्य उदाहरणद्वयं लिखत?
३४. ज्ञानं कति विधम्?

३५. प्रमा शब्दस्यार्थः कः?
३६. घटपटादि विषयज्ञानं केन कारणेन सम्भवन्ति?
३७. अनु–मानम् इति पदयोः अर्थः कः?
३८. सपक्षः नाम कः?
३९. विपक्षासत्त्वस्य उदाहरणं किम्?
४०. कः पक्षः?
४१. अनुमानहेतोः कति रूपाणि भवन्ति?

अधोलिखितानां प्रश्नानाम् उत्तराणि स्वभाषया शतं शब्दैः लिखन्तु।

१. मङ्गलाचरणस्य उद्देश्यं प्रयोजनं च वर्णयत।
२. पिटकत्रयं किम्? तत्र के विषयाः भवन्ति इति वर्णयत।
३. आर्यसत्यचतुष्टयस्य टिप्पणीं लिखत।
४. पञ्चस्कन्धान् सोदाहरणम् उल्लिखत।
५. द्वितीय–आर्यसत्यम् उपवर्णयत।
६. रत्नत्रयस्य आवश्यकतां लिखत।
७. प्रमाणद्वयं सोदाहरणं प्रतिपादयत।
८. द्वादशायतनानि आलोचयत।

१.४.६ सन्दर्भग्रन्थाः––

१. सर्वर्शनसंग्रहः––माधवाचार्यः

# तृतीयः पाठः

संरचना

३.१.प्रस्तावना
३.२.उद्धेश्यम्
३.३.ईश्वरः
३.४.षोडशपदार्थाः(प्रत्यक्षम्)
३.४.१.प्रत्यक्षचक्रम्
३.४.२.प्रत्यक्षप्रक्रिया
३.४.३.प्रत्यक्षनिष्कर्षः
३.५.अमुमानप्रमाणम्
३.६.उपमानप्रमाणम्
शब्दप्रमाणम्
३.७.प्रमेयाः
३.७.१.प्रमेयरेखाचित्रम्
३.८.पदार्थाः
३.९.आदर्शप्रश्नाः

३.१.प्रस्तावना

प्रियछात्राः! भवन्तः एतावत् पर्यन्तं बौद्धमतम् आलोचितवन्तः। तत्र आर्यसत्यचतुष्टयं, द्वादशायतनानि, प्रमाणद्वयविषये चर्चां कृतवन्तः। इदानीं षड्दर्शनसमुच्चयक्रमे न्यायमतम् आलोचयिष्यन्ति। भारतीयदर्शनपरम्परायां न्यायदर्शनम् अत्यन्तं महत्वपूर्णम् अस्ति। न्यायदर्शनस्य तर्कशास्त्रम्, प्रमाणशास्त्रम् इति रूपेण व्यवहारो भवति। ग्रन्थकारः न्यायमते षोडशपदार्थानां सम्यगालोचनं कृतवान्। एतेषां षोडशपदार्थनां सम्यक् ज्ञानेन अपवर्गस्यनाम मोक्षस्य प्राप्तिः भवति। न्यायमते षोडशपदार्थानां चर्चाकरणात् पूर्वं ग्रन्थकारः न्यायमते ईश्वरः कीदृशः? कथं च तस्य सिद्धि? इति आलोचितवान्। अतः आगच्छन्तु अत्र चिन्तयामो वयं कः ईश्वरः कथं तस्य सिद्धि? तस्य का आवश्यकता इति।

१.२.उद्धेश्यम्

षोडशपदार्थानाम् आलोचनं करिष्यन्ति
प्रमाणस्वरूपं विचारयिष्यन्ति।
प्रमेयान् चिन्तयिष्यन्ति।
ईश्वरतत्त्वम् आलोचयिष्यन्ति।

१.३.ईश्वरः

नैयायिकानां वैशेषिकाणां च मते सृष्टिकर्ता संहारस्य च कर्ता देवदेव महादेवः शिवः अस्ति। लोके यस्य कस्यापि सामान्यकार्यस्य कृते यत् किमपि कारणं भवति। तस्य कर्ता अपि कश्चित् भवति एव। यथा घटकार्यं प्रति मृत्कारणं भवति कुलालः च कर्त्ता भवति। तथैव विशालस्य विचित्रस्वरूपस्य अस्य कार्यरूपस्य प्रपञ्चस्य निर्माता कश्चित् विशिष्टगुणसम्पन्नः सर्वज्ञः, सर्वशक्तिमान् भवेत्। तादृशः ईश्वरं विना अन्यः कोऽपि न भवति। अतः ईश्वरः सृष्टिकर्ता अस्ति। नैय्यायिकाः ईश्वरस्य सत्ताम् अङ्गीकुर्वन्ति। नव्यवैशेषिकाः ईश्वरस्य सत्ताम् अङ्गीकृतवन्तः। प्रारम्भकाले वैशेषिकाः ईश्वरस्य सत्तां न अङ्गीकृतवन्तः।

न्यायमतानुसारेण ईश्वरः अनुमानप्रमाणेन सिद्ध अस्ति। ईश्वरः एतस्मिन् दर्शने कर्ता भवति, धर्ता भवति हर्ता भवति, नियन्ता भवति, ज्ञानस्य अधिकरणं च भवति। कार्यस्य कारणरूपेण ईश्वरः अस्ति। सृष्टिकार्यस्य परमाणूनां संयोजकरूपेण ईश्वरः अस्ति। उत्पन्नानां वस्तुनाम् आश्रयरूपेण ईश्वरः अस्ति, पदार्थानाम् अभिव्यक्तिरूपेण ईश्वरः अस्ति कर्मफल दातारूपेण वेदस्य मुख्यतत्त्वरूपेण ईश्वरः अस्ति। एतस्मिन् सन्दर्भे उदयनाचार्यः इदं पद्यं पठति--

**कार्य योजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।**

**वाक्यात् संख्या विशेषाच्च साध्यो विश्वविदव्ययः।। इति।।** (न्याकु ५.१.)

साक्षात् भवतु परोक्षरूपेण वा भवतु ईश्वरस्य सत्तां विना किमपि न भविष्यति। अतः ईश्वरस्य सत्तां नैय्यायिकाः प्रतिपादितवन्तः। कृपया अधोलिखितानां प्रश्नानामुत्तराणि लिखन्तु---

१. न्यायमतानुसारेण सृष्टि कर्त्ता संहारकर्ता च कः?

२. न्यायमते पदार्थानां संख्या का?

३. ईश्वरः कीदृशो भवेत्?

४. प्रपञ्चस्य कर्ता किमर्थं मनुष्यः न भवति?

ईश्वरः अस्ति---

१. धारयितारूपेण २. संहारक रूपेण ३. ज्ञानदाता रूपेण ४. आद्यसंयोजक रूपेण ५. कर्मफलदाता रूपेण ६. वेदस्य मुख्यतत्त्व रूपेण ७. स्वर्गं प्रतिप्रेरकरूपेण ८. प्रपञ्चस्य कर्ता रूपेण

१.४.षोडशपदार्थाः

प्रिय छात्राः पूर्वस्मिन् अनुच्छेदे भवन्तः न्यायमते ईश्वरस्य चिन्तनं कथम् इति पठितवन्तः। षोडशपदार्थाः न्यायशास्त्रस्य प्रमेयाः भवन्ति इति आलोचितवन्तः। तेषु षोडशपदार्थेषु केचन प्रमाणपदार्थाः केचन प्रमेय पदार्थाः च भवन्ति। इदानीं भवन्तः प्रमाणपदार्थस्य आलोचनं करिष्यन्ति। प्रमाणं नाम–प्रमायाः करणं साधनम् इति। प्रमा पदस्य ज्ञानम् इति अर्थः। बुद्धिः, अनुभवः, उपलब्धिः एतानि ज्ञानपदस्य पर्याय पदानि भवन्ति। प्रमाणशब्दस्य वर्णनप्रसङ्गे ग्रन्थकारः एवं कथयति अर्थोपलब्धिहेतुः प्रमाणम् इति। पदार्थज्ञानं प्रति यत् कारणं भवति तत् प्रमाणम् इति आशयः। प्रमेय निरूपणार्थं स्वीकृतं प्रमाणं चतुर्विधं भवति तत् च
१. प्रत्यक्षम् २. अनुमानम् ३. उपमानम् ४. शब्दः इति। तत्र प्रत्यक्षस्य लक्षणं न्यायमते एवं भवति––
इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानम् इति विषयैः सह चक्षुरादि ज्ञानेन्द्रियाणां सम्बन्धद्वारा यत् ज्ञानम् उत्पन्नं भवति तत् प्रत्यक्षम् इति भावः। न्यायमते प्रत्यक्षप्रक्रिया एवम् अस्ति

१.४.१.सम्बन्धः

आत्मा मनः इन्द्रियाणि

मनसा सह इन्द्रियैःसह विषयैः सह

प्रत्यक्षज्ञानम्

अर्थात् प्रत्यक्षज्ञानस्य उदयात् पूर्वं प्रथमम् आत्मा मनसा सह सम्बन्धं प्राप्नोति द्वितीयतः मनः ज्ञानेन्द्रियैः सह सम्बन्धं प्राप्नोति तृतीयतः इन्द्रियाणि विषयैः सह सम्बन्धं स्थापयन्ति। ततः प्रत्यक्षज्ञानं भवति। एतस्मिन् प्रसङ्गे ग्रन्थकारः एवं कथयति–––

आत्मा सहैति मनसा मल इन्द्रियेण
स्वार्थेन चेन्द्रियमिति क्रम एष शीध्रम्।
योगोऽयमेव मनसः किमगम्यमस्ति
यस्मिन्मनो व्रजति तत्र गतोऽयमात्मा।। इति।।

प्रत्यक्षस्य स्वरूपं ग्रन्थकारः एवं वर्णयति–– इन्द्रियार्थसन्निकर्षोत्पन्नम्, अव्यभिचारिकम्, व्यवसायात्मकम् व्यपदेशविवर्जितम् इति अर्थात्

१.४.२.

प्र–––इन्द्रियाथसन्निकर्षोत्पन्नद्वारा भवति।
त्य––भ्रान्तिज्ञानरहितं भवति।
क्ष––– व्यवहारसाधकं भवति सविशेषम् इति अर्थः
म्––– निर्विशेषं नामजात्यादि धर्मरहितं प्रत्यक्षं भवति

इन्द्रिय–विषययोः सम्बन्धं विना अन्येन उपायेन प्रत्यक्षं न सम्भवति इति कथनार्थं ग्रन्थकारः प्रत्यक्षस्य स्वरूपवर्णन वेलायां इन्द्रियार्थसन्निकर्षोत्पन्नम् इति विशेषणपदस्य प्रयोगं कृतवान्। द्वितीयं विशेषणम् प्रयुक्तवान् अव्यभिचारिकम् इति। व्यभिचारिकं नाम दुष्टं ज्ञानम्। उदाहरणं यथा रज्जुं दृदवा सर्प ज्ञानम्, प्रत्यक्षं तथा न भवेत् शुद्धं निर्दुष्टं च भवति इति बौधमार्थं अव्यभिचारिकम् इति। तृतीयं विशेषणम् अस्ति व्यवसायात्मकम्,

अर्थात् व्यवहारसाधकं सविशेषं च ज्ञानं भवति प्रत्यक्षम् इति बोधनार्थं व्यवसायात्मकम् इति। व्यवसाय पदेन सविकल्पकप्रत्यक्षस्य बोधो भवति। यथा-- अयं बालकः, अयं घटः, इदं मन्दिरम् इत्याकारकं ज्ञानम्। चतुर्थं विशेषणम् अस्ति व्यपदेशविवर्जितम् इति अर्थात् विषयं विना केवलस्य ज्ञानस्य प्रत्यक्षं भवति इति बोधनार्थं व्यपदेशविवर्जितम् इति। यथा इत्थम् कूटस्थम् स्थूणः इत्यादि। साररूपेण प्रत्यक्षविषये वक्तुं शक्नुमः--

१.४.३

१.इन्द्रियेण अर्थस्य सम्बन्धात् उत्पन्नं ज्ञानं प्रत्यक्षम्

२.भ्रान्तिज्ञानरहितं निर्दुष्टं ज्ञानं भवति प्रत्यक्षम्

३. प्रत्यक्षं सविकल्पकं व्यवहारसाधकं भवति

४. प्रत्यक्षं नाम जात्यादिधर्मरहितं निर्विकल्पकं भवति इति।

कृपया अधो निर्दिष्टं दृश्यं सावधानेन पश्यन्तु।

१.४.४ आत्मा ज्ञानम्, मनः, इन्द्रियम्, विषयः, प्रत्यक्षम्

अयं घटः

प्र-इन्द्रियार्थसन्निकर्षोत्पन्नम्-अस्ति

त्य-अव्यभिचारिकम्-अस्ति

क्ष-व्यवसायात्मकम्-अस्ति

म्-व्यपदेशविवर्जितम्-अस्ति

१.४.५ कृपया अधोलिखितानां प्रश्नानामुत्तराणि लिखन्तु।

१. न्यायमते प्रमाणानि कानि?

२. प्रत्यक्षस्य लक्षणे कानि विशेषणानि सन्ति

३. ज्ञानेन्द्रियाणि कानि?

४. न्यायमते प्रत्यक्षे कानि सोपोनानि भवन्ति?

१.५. भवन्तः एतावत् पर्यन्तं प्रमाणानां चर्चाक्रमे प्रत्यक्षप्रमाणं पठितवन्तः। प्रत्यक्षलक्षणं चर्चितवन्तः। इदानीम् अनुमान् प्रमाणम् आलोचयिष्यन्ति। तत्र अनुमानम् इति पदस्य विश्लेषणम् एवं भवति अनुमीयन्ते पदार्थाः अनेन इति अनुमानम्। प्रत्यक्षज्ञानात् अनु पश्चात् जायमानं ज्ञानम् अनुमानपदस्यार्थः। एतत् अनुमानस्य कृते पक्षः, साध्यम्, हेतुः एतत् त्रितयम् आधारभूतं भवति। व्याप्तिः अनुमानस्य हृदयं भवति। तत्र पक्षः नाम-साध्यस्य सन्देहस्थलम्। यथा पर्वतः। साध्यम् नाम साधयितुं योग्यः पदार्थः, यथा--वहिनः हेतुः नाम कारणं येन रहस्यतया विद्यमानस्य साध्यस्य आविष्करणं भवति। यथा--धूमः। व्याप्तिः नाम हेतु साध्ययोः मध्ये विद्यमानः कश्चन अविनाभावः सम्बन्धः। यथा-- यत्र धूमोऽस्ति तत्र अग्नि निश्चयेन भवति इति।

इदम् अनुमानं त्रिविधम् अस्ति इति आचार्य हरिभद्रसूरिः प्रतिपादयति। तच्च पूर्ववत्, शेषवत्,

सामान्यतो दृष्टम् इति। एतत्प्रकारं सूत्रकारः महर्षिगौतमः अपि समर्थितवान्। तद्यथा-- तत्पूर्वकं त्रिविधमनुमानं पूर्ववत्, शेषवत्, सामान्यतोदृष्ट च।। इति।

पूर्ववत्--कारणं दृष्ट्वा यत्र कार्यस्य अनुमानं भवति तत्र पूर्ववत् अनुमानं भवति।

शेषवत्--कार्यं दृष्ट्वा यत्र कारणस्य अनुमानं भवति तत्र शेषवत् अनुमानं भवति।

सामान्यतोहष्टम्--कार्यकारणभिन्नलिङ्गकं अनुमानं यत्र भवति तत् सामान्यतो हष्टम् अनुमानम् इति।

अत्यन्तं कृष्णवर्णयुक्तं मेघखण्डं दृष्वा वृष्टिः अवश्यं भविष्यति इति विषयकम् अनुमानं पूर्ववत् अनुमानं भवति। अत्यन्त कृष्णवर्णाः मेघाः निश्चयेन वर्षन्ति। एतदेव पूर्ववत् अनुमानस्य उदाहरणम् अस्ति। एतस्मिन् सन्दर्भे ग्रन्थकारः कथयति कृष्णभ्रमरसदृशाः मेघाः, कृष्णदृमहिषसदृशाः मेघाः, कृष्णसर्पसदृशाः मेघाः कृष्णमत्तगजतुल्याः मेघाः,घनान्धकारः कानन सदृशाः मेघाः च निश्चयेन वृष्टिं कारयन्ति। यतः पूर्वम् एतादृशाः कृष्णघनाः मेघाः वृष्टिं कारयन्ति स्म। तडित युक्ता गर्जिताः घनाः, अपि निश्चयेन वर्षन्ति। पूर्वम् आकाशे उपर्युक्त गुणयुक्ता मेघाः यदा यदा दृष्टा तदा अवश्यं वृष्टि अभवत् निश्चयः। इदानीं दृष्टः मेघ अपि तादृश एव अतः मेघः अवश्यं भविष्यति इति। प्रकृत-उदाहरणे कृष्णमेघः कारणं भवति, वृष्टिः च कार्यं भवति।

कार्यद्वारा यत्र कारणस्य अनुमानं भवति तत् शेषवत् अनुमानं भवति। तस्य उदाहरणं यथा-नद्यां जलप्रवाहं दृष्ट्वा उपरितन प्रदेशे वृष्टिरभवत् इति चिन्तनम्। एतदेवतत्त्वं नैय्यायिकाः एवं कथयन्ति-जलधराभिवर्षण ज्ञानं शेषवत् भवति इति।

कार्य कारणभिन्नलिङ्गकमनुमानं सामान्यतो दृष्टमनुमानम् अस्ति। तस्य उदाहरणम्--सूर्यगतिमान् पुरुषगतिवत् इति। यथा पुरुषस्य गति निरूपणं देशात् देशान्तरप्राप्ति द्वारा भवति तथैव सूर्यम् अपि प्रातः काले पूर्वदिशि भवति सायंकाले पुनः पश्चिमायां दिशि भवति, सूर्यस्य उदयाचलतः अस्ताचलं प्रति यत् गमनं यद्यपि प्रत्यक्षं नास्ति तथापि तस्य गतिः अनुमानं तु शक्यं भवति। अत्र भविष्यत् कालीनस्य अर्थस्य साधनार्थं पूर्ववद् अनुमानस्य आवश्यकता अस्ति। अतीतकालीनस्य अर्थस्य साधनार्थं शेषवत्-अनुमानस्य आवश्यकता अस्ति। वर्तमानकालीनस्य अर्थस्य साधनार्थं सामान्यतोदृष्टस्य अनुमानस्य आवश्यकता अस्ति। इति चिन्तनं कर्तुं शक्यते।

कृपया इमां सारणीं पश्यतु--

१.५.१. अनुमानम्

पूर्ववत्   शेषवत्   सामान्यतोदृष्टम्

१. कारणद्वारा कार्यस्य अनुमानम्- पूर्ववत्-अयं कृष्णमेघः वर्षिष्यति।

२. कार्यद्वारा कारणस्य अनुमानम्-शेषवत्-समुद्रस्य एकः जल बिन्दुः लवणयुक्तं अतः निखिलमपिजलं लवणं

३. कार्य-कारणभिन्नलिङ्गकमनुमानम्-सामान्यतो दृष्टम्- सूर्यः

१.३.२
कृपया अधोलिखितान् प्रश्नान् सावधानेन पठन्तु, उत्तरं च लिखन्तु।
१.अनुमानम् इति पदस्यार्थः अस्ति......

२. हेतुः कस्य आविष्करणं करोति?

३. त्रिविधमनुमानम् अस्ति?

४. शेषवत् अनुमाने कस्य अनुमानं भवति?

१.६. भवन्तः एतावत् पर्यन्तम् अनुमानप्रमाणं पठितवन्तः। तत्र अनुमानस्य स्वरूपम्, प्रकारणम्, कारणं च आलोचितवन्तः। इदानीम् उपमानप्रमाणम् शब्दप्रमाणं आलोचयिष्यन्ति। तत्र उपमानं नाम–उपमीयन्ते अनेन पदार्थाः इत्युपमानम्। तस्य लक्षणं संज्ञा–सज्ञि सम्बन्ध ज्ञानम् इति न्यायशास्त्रे उक्तम् अस्ति। एतदेव तत्त्वं ग्रन्थकारः एवं वर्णयति--

**प्रसिद्धवस्तु साधर्म्यात् अप्रसिद्धस्य साधनम्।**
**उपमानं समाख्यातं यथा गौरवियस्तथा।। इति।।**

यत्र अप्रसिद्धस्य पदार्थस्य सिद्धिः प्रसिद्धवस्तुनः सादृश्यधर्मबलात् भवति तत्र उपमानप्रमाणं भवति। यथा---अप्रसिद्धस्य गवय इति पदार्थस्य सिद्धि प्रसिद्धेन गौ नाम पदार्थस्य सदृशधर्मबलेन भवति। अरण्ये विद्यमानः गवय पदार्थः नाम नीलवर्ण विशिष्टा काचित् धेनुः, सा च अप्रसिद्धा। अरण्ये विचरणमाणा तां नूतनां धेनुसदृशीं गो पिण्डं दृष्ट्वा अरण्यं प्रति गतः पुरुषः पूर्वं दृष्टं प्रसिद्ध गो पिण्डं स्मरति। पूर्वदृष्ट प्रसिद्धस्य गोपिण्डस्य सादृश्य धर्म स्मरणेन अरण्ये दृष्टे पिण्डे अयं गवय इति बुद्धिं प्राप्नोति। एतदेव उपमान प्रमाणं भवति।

न्यायमते शब्दः चतुर्थं प्रमाणं भवति शब्दस्य स्वरूपं ग्रन्थकारः एवं वदति---आप्तोपदेशस्तु शाब्दः इति। आप्तः अत्र अवितथवदी नाम यथार्थवक्ता, हतवचनवक्ता। तादृशेन सदा यथार्थवादिना यत् उच्यते तत् शब्दप्रमाणम् इति अर्थः। एषः शब्दः द्विविधो भवति। तत्र प्रथमः वैदिकशब्दः, द्वितीयः लौकिकशब्दः इति।
१.६.१ कृपया अधोलिखितान् प्रश्नान् सावधानेन पठन्तु, समाधानं लिखन्तु च
१. उपमानं नाम.....

२. उपमानस्य उदाहरणं किम्?

३. कः आप्तो भवति?

४. शब्दस्य भेदद्वयं किम्?

१.७. प्रमेयाः--

एतावत्पर्यन्तं भवन्तः प्रमाणान् विचरितवन्तः। इदानीं न्यायमतानुसारं प्रमेयानां चर्चां करिष्यन्ति। तत्र प्रमेयः नाम प्रमायां यः विषयो भवति सः प्रमेयः। अर्थात् यथार्थज्ञाने विषयरूपेण यः भासते सः प्रमेयो भवति। यथा---अयं--विद्यालयः, इदं भवनम्, अयं घटः इत्यादिषु यथार्थज्ञानेषु विद्यालयः, भवनम्, घटः इति एते पदार्थाः प्रमेयाः भवन्ति। अत्र अयं घटः इति यथार्थज्ञानम् अस्ति। एतस्मिन् ज्ञाने घटः विषयस्य स्थाने अस्ति अतः घटः अत्र प्रमेयो भवति। एतद् बोधयितुं ग्रन्थकारः इदं वचनं कथयति---प्रमेयग्राहयो अर्थः प्रमेयः इति। एतन्मते प्रमेयाः द्वादशप्रकारकाः भवन्ति। अतः न्यायसूत्रकारः गौतममहर्षिः कथयति --- आत्मशरीरेन्दियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गस्तु प्रमेयम्।। इति।

परन्तु आचार्य हरिभद्रसूरिः अत्र--आत्म---देहः अर्थ--बुद्धिः--- इन्द्रिय सुखम् इति एतान् षट्संख्यकान् प्रमेयान् चर्चितवान्। तत्र ग्रन्थे प्रमेयानामुल्लेखम् एवं कृतवान् --प्रमेयं त्वात्मदेहार्थबुद्धीन्द्रियसुखादि चेति।। तत्र आदि पदेन न्यायदर्शनाभिमतानाम् अन्येषां द्वादशप्रमेयाणां ग्रहणम् इति अर्थं व्याख्यायां सूचयति। तत्र आत्मा नाम--ज्ञानाधिकरणम् अर्थात् ज्ञानस्य यः आधारः अर्थात् अधिकरणं नाम आश्रयो भवति सः आत्मा इति कथ्यते। सर्वस्यापि ज्ञानस्य आधारः आत्मा अस्ति इति नैय्यायिकाः कथयन्ति। द्वितीयं प्रमेयः अस्ति देहः इति। तत्र देहो नाम इन्द्रियाश्रयः इति अर्थात् इन्द्रियाणाम् आश्रयरूपेण विद्यमानं तत्तम् देह इति। इन्द्रियाणि ज्ञानसाधनानि कर्मसाधनानि च भवन्ति। तत्र ज्ञानसाधनानि श्रोत्र-त्वक्-चक्षु-रसना-ध्राणम् इत्येतानि पञ्चज्ञानसाधनानि इन्द्रियाणि भवन्ति। वाक् - पाणि - पाद - पायु - उपस्थ इत्येतानि पञ्चकर्मसाधनानि इन्द्रियाणि भवन्ति एतेषां दाशविधानाम् इन्द्रियाणाम् आश्रयस्थलं देहो भवति। तृतीयं प्रमेयः अस्ति अर्थः इति।

तत्र चतुर्थं प्रमेयः अस्ति बुद्धिः इति- तत्र बुद्धि नाम निश्चयात्मिकान्तः करणवृत्तिः अथीत् येन साधनेन यस्य कस्यापि विषयस्य विषये निश्चयात्मकं ज्ञानं भवति तादृशं ज्ञानसाधनं बुद्धि भवति। यथा-- अयं पुरुषः इति सन्दर्भे अयं पुरुषः इति विषये ज्ञान निर्धारणं यत्र भवति तत् बुद्धितत्त्वम् अस्ति। पुरुषं दृष्ट्वा यदा ज्ञाता अयं पुरुषो वा नवा? इति संशयं न प्राप्नोति, अयं स्त्री इति न भ्रमे पतति तदा अयं पुरुषः एव इति निश्चयात्मकं ज्ञानं प्राप्नोति। एतादृशं निश्चयात्मकं ज्ञानं या करोति सा बुद्धि भवति।
पञ्चमं प्रमेयः अस्ति इन्द्रियम्। भोगसाधनम्। इन्द्रियम् इति। लोके विषयसुखादीनां साधनानि यानि भवन्ति तानि इन्द्रियाणि भवन्ति। यथा--स्वादुयुक्तभोजनेन सुखस्य प्राप्तिः, धनप्राप्तिनिमित्तसुखानुभवः येन करणेन भवति तत् करणम्- साधनम् एव इन्द्रियम् अस्ति। अतः उक्तमस्ति शास्त्रे- सुखाद्युपलब्धि साधनम् इन्द्रियम् इति।

इदम् इन्द्रियं द्विविधं भवति। तत् यथा ज्ञानेन्द्रियम् कर्मेन्द्रियम् इति। ज्ञानसाधकानि पञ्चइन्द्रियाणि भवन्ति कर्मसाधकानि आपि पञ्चइन्द्रियाणि भवन्ति।

षष्ठं प्रमेयः अस्ति सुखम् इति। तत्र सुखं नाम–––सर्वेषामनुकुलवेदनीयम् इति। यत् सर्वेषां मानावानाम् इष्टं भवति तत् सुखम्। यथा––परीक्षायां सर्वोच्चाङ्कानां प्राप्तिः, छात्रस्य अभीष्टं भवति। यदा अङ्कप्राप्तिः भवति तदा तस्य छात्रस्य सुखं भवति। पुण्यार्जनं मानवस्य अभीष्टं भवति यदा पुण्यम् अर्जितं भवति तदा पुण्यकारणतः स्वर्गसुखम् अनुभवति। एवं लोके विविधानुकुलपरिवेशतः सुखानि अनुभूयन्ते। इदं सुखं सर्वेषाम् इष्टं भवति। संसारे सर्वेऽपि जनः सुखं वाञ्छति। अतः शास्त्रेषु इदं वचनम् अस्ति सुखं मे स्यात् दुःखं मा भूत्।। इति। एवं षडदर्शनसमुच्चयग्रन्धानुसारेण प्रमेयचर्चा भवति।

१.७.१

प्र–आत्म––ज्ञानाधिकरणम्

मे–देहः–इन्द्रियाश्रयः देहः

याः–बुद्धिः––निश्चयात्मिकान्तःकरणवृत्तिः

याः– इन्द्रियम्–सुखाद्युपलब्धिसाधनम्

इन्द्रियम्–ज्ञानेन्द्रियम्, कर्मेन्द्रियम्

ज्ञानेन्द्रियम्––श्रोत्र–त्वक्–चक्षु–रसना–घ्राणः

कर्मेन्द्रियम्––वाक्–पाणि–पाद–पायु–उपस्थ

कृपया अधोनिर्दिष्टान् प्रश्नान् पठन्तु, उत्तराणि च लिखन्तु

१.७.२

१. प्रमेयाः इत्युक्ते.........

२. न्यायमते प्रमेयाः कति भवन्ति?

३. आत्मनः लक्षणं किम्?

४. सर्वोऽपि जनः किम् इच्छति?

१.८ पदार्थाः–––न्यायमते तत्त्वं द्विविधम् अस्ति। एकं सत् तत्त्वम् अपरम् असत् तत्त्वम् इति। सतः पदार्थस्य षोडशप्रकारैः वर्णनं कृतम्। तद्यथा प्रमाण–प्रमेय–संशय–प्रयोजन–दृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजन्य वितण्डा हेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निश्श्रेयसाधिगमः इति सूत्रम्। प्रकृतग्रन्थे ग्रन्थकारः प्रमाण विचारं कृतवान्, ततः प्रमेय विचारं प्रस्तूतवान्, अनन्तरं पदार्थानां चर्चां कृतवान्। इदानीं वयं पदार्थानां स्वरूपं किम्? ते किमर्थाः? कानि तद्बोधकानि उदाहरणानि इत्यादीनां विषये चर्यां करिष्यामः। तत्र संशयो नाम परस्परविरुद्धकोटिक ज्ञानस्य एकत्र विद्यमानता यथा––अयं मेरुः, प्रासादो वा? इत्याकारकं ज्ञानम्। यत्र ज्ञानं सन्दिग्धं भवति तत्र संशयस्य विद्यमानता स्थिति इति नैय्यायिकाः कथयन्ति। तत्र चतुर्थो

पदार्थः प्रयोजनं भवति। प्रयोजनं नाम यद्वारा प्रेरितः मानव अर्थं निमित्ती कृत्य प्रवर्तते तत् प्रयोजनम्। एतदेव ग्रन्थकारः स्वभाषया वर्णयति यत्प्रवर्तनं तत्प्रयोजनम् इत्यर्थः तत्र पञ्चमपदार्थः दृष्टान्तः नाम। तत्र दृष्टान्तः नाम वादी–प्रतिवादी उभयसम्मतो निर्विवाद स्थलविशेषः दृष्टान्त। यथा–––महानसः महानसः उभयसम्मतः अतः दृष्टान्तो भवति। दृष्टान्तस्य सन्दर्भे ग्रन्थकारः एवं वर्णयति।

**तावदेव चलत्यर्थो मन्तुर्गोचरमागतः।**
**यावन्नोत्तम्भनेनैव दृष्टान्तेनावलम्ब्यते।। इति।**

तत्र षष्ठपदार्थो सिद्धान्त भवति। प्रमाण प्रतीत्या इदम् इत्थम् इत्येवं प्रकारेण निर्णीतः अर्थः सिद्धान्तः अस्ति। एषः सिद्धान्तः चतुर्धा कथितः। १. सर्वतन्त्रसिद्धान्तः, २, प्रतितन्त्रसिद्धान्तः ३. अधिकरणसिद्धान्तः ४. अभ्युपगमसिद्धान्तः इति।

यः सिद्धान्तः निर्विवादेन सर्वैः स्वीकृतो भवति सः सर्वतन्त्र सिद्धान्तः। यथा–––मानवः मरण शीलः ज्ञानेन्द्रियाणां संख्या पञ्च भवन्ति। एवं प्रकारकाः

द्वितीयसिद्धान्तस्य नाम अस्ति प्रतितन्त्रसिद्धान्त इति। यः सिद्धान्तः स्वमतानुसारेण स्वीकृतः अन्यमते अस्वीकृतः सिद्धान्तः प्रतितन्त्रसिद्धान्तो भवति। यथा सत् अविनाशी, पुरुषः अपरिणामी, असत् नोत्पद्यते, असदुत्पद्यते इत्येवं भूतानि। अत्र असतः उत्पत्ति नास्ति इति सांख्यमतम् असतः उत्पत्ति भवति इति न्यायमतम्। एतत्परस्परं प्रतितन्त्रसिद्धान्तस्य उदाहरणम् अस्ति।

तृतीय सिद्धान्तस्य नाम अस्ति अधिकरण सिद्धान्त इति। यस्य सिद्धान्तस्य सिद्धिद्वारा अन्यत्रप्रकरणेस्थितस्य सदृश अर्थस्य सिद्धि सम्भवति स अधिकरणसिद्धान्तो भवति। यथा––दर्शनं–– स्पर्शनं देहेन्द्रियं विनाज्ञातं न भवति। अनेन सम्बद्धः सदृशो वा विषयः इन्द्रियाणां नानात्वम्, इन्द्रियाणि नियतविषयाणि भवन्ति एव भूतानां विषयाणां सिद्धि देहेन्द्रियव्यतिरिक्तो ज्ञाता दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् इति अनुमानं विना न सम्भवति। एवं च परस्परं एकेन अपरस्य प्रमाणीकरणम् अधिकरण सिद्धान्तः इत्यर्थः।।

चतुर्थसिद्धान्तस्य नाम अभ्युपगमसिद्धान्तः इति। सूत्रैरपरीक्षितस्यशास्त्रेषु उपलब्धस्य अर्थस्य विशेषपरीक्षणम् अभ्युपगमसिद्धान्तो भवति। यथा––शब्दः द्रव्यम्। स च नित्यः अनित्यो वा इति विशेषपरीक्षा अभ्युपगमसिद्धान्तेन कृता अस्ति।

तत्र सप्तमपदार्थ अवयव भवति। अवयवानां सन्दर्भे भगवान् सूत्रकारः एवं लिखति––

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः इति। तत्र अवयवाः पञ्चविधाः भवन्ति। ते एवं प्रकारकाः सन्ति– १. प्रतिज्ञा, २. हेतुः, ३. दृष्टान्तः ४. उपनयः ५. निगमनम् इति। एतेषां पञ्चावयवानां समूहः न्याय इति कथ्यते। पर्वतो वह्निमान् इति प्रतिज्ञावाक्यम्। अतः उच्यते साध्य विशिष्टः पक्षः प्रतिज्ञा इति। द्वितीयावयवस्य नाम हेतु भवति। लिङ्गवचनम् हेतु इति कथ्यते। तत्र लीनस्य रहसि विद्यमानस्य अर्थस्य विषयस्य येन वचनेन प्रकाशो भवति तत् हेतुवचनम्। यथा––धूमात् इति। तृतीयावयवस्य नाम दृष्टान्तमस्ति। उदाहरणवचनं दृष्टान्त इति कथ्यते। यथा यो यो धूमवान् अस्ति स स वह्निमान् यथा महानसः इति। चतुर्थस्य अवयवस्य

नाम अस्ति उपनय तत्र उपनयो नाम हेतोरुपसंहारकं वचनम्। यथा अयं पर्वतः धूमवान् इति। पञ्चमस्य अवयवस्य नाम निगमनम् अस्ति। तत्र निगमनं नाम हेत्वपदेशेन पुनः साध्यधर्मोपसंहरणम् इति। यथा–तस्मात् पर्वतोऽयं वह्निमान् इति।

पदार्थानां क्रमे तर्कः नाम अष्टमपदार्थोऽस्ति। संशयोपरमः तर्कः। इति तर्कस्य लक्षणं ग्रन्थकारः अत्र वर्णितवान्। अर्थात् सम्यग् रूपेण पदार्थस्वरूप जिज्ञासा येन क्रियते सः तर्कः। यथा–स्थाणु वा पुरुषो वा। इति उदाहरणं संशयस्य भवति। संशयिते अर्थे ज्ञाता यदा वास्तविकं तत्तं किम्? इति ज्ञातुम् इच्छति तदा हेतुभिः निर्णयं करोति। निर्णयस्य कृते उपयुज्यमानः हेतुः कारणं वा तर्कः भवति इति वक्तुं पारयामः। तर्कः इति पदस्य ऊहः इति अपरः अर्थः शात्रेषु उक्तः दृश्यते। ततः नवमपदार्थ अस्ति निर्णयः इति। सन्देहतर्काभ्यां परीक्षणात् परं निश्चयात्मिका प्रतीतिः निर्णयो भवति। यथा पुरुष एव अयम् इति विषयकं निश्चयज्ञानम्। निर्णयस्य स्वरूपसन्दर्भे आचार्यगौतमस्य इदं सूत्रं स्मरामः––

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः इति। दशमपदार्थरूपेण वादः अस्ति। तत्र वादो नाम गुरुशिष्ययोः मध्ये उच्यते। अर्थात् तत्त्वं लक्षीकृत्य वादिप्रतिवादिनोः मध्ये परस्परम् अवगम्य प्रचाल्यमाना कथावाद इति कथ्यते। वादकथायां उभयमपि पक्षः स्वमतप्रकटनं करोति। फलमुद्दिश्य पक्षप्रतिपक्षाभ्याम् आयोज्यमाना गोष्ठीः वादपदेन अवगन्तुं शक्यते।

एकादशतमपदार्थरूपेण जल्पस्य ग्रहणं भवति। तत्र जल्पो नाम परपक्षनिराकरणपूर्वक स्वपक्षस्थापनावती विजिगीषुकथा। एषैव जल्पकथा कारणान्तरेण वितण्डा भवति। यस्यां वादी स्वपक्षस्य स्थापने असमर्थः परपक्षस्य खण्डने समर्थः तत्परो वा भवति तदा सा कथा वितण्डा भवति। यथा– आत्मा अनित्यः अनित्यम् एकानुगतं सामान्यम् इत्यादि। एतदेव ग्रन्थकारः अत्र कथयति––विजयाभिलाषि वादिप्रतिवादि प्रारब्ध प्रमाणोपन्यास गोष्ठ्यां सत्यां छलजात्यादि दूषणम् इति। द्वादशतमपदार्थरूपेण वितण्डायाः ग्रहणं भवति। स्वपक्षस्थापनहीना परपक्षदूषणतत्परकथा विशेषः वितण्डा भवति। त्रयोदशतमपदार्थरूपेण हेत्वाभासस्य ग्रहणम्। हेत्वाभास नाम मिथ्याहेतुः इत्यर्थः। हेतुवद् आभासन्ते इति हेत्वाभासाः। ते च हेत्वाभासाः पञ्चविधाः सन्ति। तद्यथा–असिद्धः, विरुद्धः अनैकान्तिकः, कालात्ययापदिष्टः, प्रकरणसम इति। पक्षे हेतोः अविद्यमानता नाम अनुपस्थितिः असिद्ध इति कथ्यते। स च असिद्धः आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वा सिद्ध इति भेदेन त्रिविधो भवति। पक्षः हेतोः आश्रयस्थानं भवति। यदा पक्षः एव असत् भवति तदा हेतुः तत्र कथं वा तिष्ठति। एतादृश सन्दर्भविशेष एव आश्रयासिद्धः इति शास्त्रज्ञाः कथयन्ति। उदाहरण्– गगनारविन्दं सुरभिः अरविन्दत्वात् इति। अत्र अरविन्दस्य आश्रयं गगनं न कदापि भवितुमर्हति।

स्वरूपासिद्धस्य स्थले पक्षः सत् भवति परन्तु हेतोः एव स्वरूपसिद्धिः न भवति उदाहरणं यथा––– शब्दः अनित्यः दृश्यत्वात् इति। दृश्यत्वरूपस्य हेतोः एव स्वरूपसिद्धि अत्र नास्ति। यत्र हेतुः सोपाधिको भवति तत्र व्याप्यत्वासिद्धो भवति। उदाहरणं यथा––– पर्वतवह्निमान् धूमत्वात् इति। अत्र साध्यसाधनयोःनियतसम्बन्धः न स्पष्टः। तप्ते अयः पिण्डे यद्यपि वह्निः अस्ति तथापि तत्र धूमः न भवति। ततः विरुद्धः इति द्वितीयः। यः हेतुः ज्ञानार्थस्य विरोधी भवति सः विरुद्धः इति कथ्यते। अर्थात् यत्र हेतुः

सिद्धस्य साध्यस्य अभावं सूचयति सः विरुद्धः इति। उदाहरणं यथा--- शब्दः नित्यः उत्पत्तिमत्वात् इति। अत्र नित्यत्वविरोधी उत्पत्तिमत्वात् अस्ति। तत्र अनैकान्तिकः इति तृतीयः। आचार्य गौतमः कथयति अनैकान्तिकः सव्यभिचारः इति। एषः अनैकान्तिकः त्रिविधो भवति। साधारणः,असाधारणः,अनुपसंहारी इति। तत्र कालात्ययापदिष्टः इति चतुर्थः। यः प्रयुक्तः हेतुः एकदेशेन कालातीतयुक्तो भवति सः कालात्ययापदिष्टः इति। तत्र प्रकरणसमः इति पञ्चमप्रकारः। यस्मात् प्रकरणान्विता स निर्णयार्थमपदिष्टः प्रकरणसमः इति। अर्थात् यम् आधारीकृत्य विचारः प्रवर्तते पुनः निर्णयवेलायां तस्य हेतुरूपेण प्रयोगो भवति। सः प्रकरणसमनाम हेत्वाभासः इति। उदाहरणं यथा--- अनित्यः शब्दः नित्यधर्मानुपलब्धेः इति।

तत्र छलं नाम शब्दवृत्तिव्यत्ययेनेतरार्थकल्पनम्। एतदेव कथयति भगवान् सूत्रकारः - वचनविघातोऽर्थविकल्पोपपत्या छलम् इति। एतत् छलं त्रिविधं भवति। १.वाक्छलम् २.सामान्यछलम् ३.उपचारच्छलम् इति। तत्र वाक्छलं नाम वक्तुः विवक्षितार्थस्य विरुद्धार्थकल्पनम्। यथा नवकम्बलोऽयं देवदत्तः इति। एतदेव वर्णयति महर्षिगौतमः --- अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् इति ।तत्र सामान्यच्छलं नाम सामान्यतः सम्भवेऽर्थे असम्भवार्थस्य कल्पनं सामान्यच्छलं भवति। उदाहरणं यथा- ब्राह्मणोऽयं विद्याशीलसम्पन्नः इति। एतदेव वर्णयति सूत्रकारः-- सम्भवतोऽर्थस्य अतिसामान्य योगादसम्भूतार्थकल्पना सामान्यच्छलम् इति।

तत्र उपचारच्छलं नाम - स्वभावविकल्पकनिर्देशक वाक्ये अर्थसत्तायाः निषेधनम् इति। यथा- मञ्चाः क्रोशन्ति एतदेव कथयति भगवान् सूत्रकारः - धर्मविकल्पनिर्देशोऽर्थसद्भावप्रतिषेध उपचारच्छलम् इति ततः जाति नाम सदृश विशदृशद्वारा हेतोः प्रतिषेधः इति। यथा -- किं घटसाधर्म्यात् कृतकृत्वादनित्यः शब्दः किं वा तद्वैधर्म्येणाकाशसामान्यान्निरवयवत्वात् अनित्य इति ।

एतदेव निरूपयति सूत्रकारः--साधर्म्य वैधर्म्याभ्यां प्रत्यवस्थानं जातिः इति। ततः निग्रहस्थानम् इति अन्तिमः पदार्थः। विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् इति सूत्रकारः कथयति। विप्रतिपत्ति नाम यत्र साधनाभास अस्ति परं तत्र साधनबुद्धि जायते। अप्रतिपत्तिः यथा--साधनस्य अदूषणम्, दूषणस्य च अनुद्धरणम् इति। एतस्य निग्रहस्थानस्य द्वाविंशभेदाः सन्ति। तानि एवं रूपाणि भवन्ति १. प्रतिज्ञाहानिः, २.प्रतिज्ञान्तरम्, ३. प्रतिज्ञाविरोधः ४. प्रतिज्ञासंन्यासः,हेत्वान्तरम्,अर्थान्तरम्,निरर्थकम्,अविज्ञातार्थम्,अपार्थकम् अप्राप्तकालम्, न्यूनम्, अधिकम्, पुनरुक्तम्, अननुभाषणम्, अज्ञानम् अप्रतिभा, विक्षेपो, मतानुज्ञापर्यनुयोज्योपेक्षणं, निरनुयोज्यानुयोगः, अपसिद्धान्तः, हेत्वाभासः इति।

निग्रहस्थानम्　　उदाहरणम्

१. प्रतिज्ञाहानिः--शब्दः अनित्यः ऐन्द्रियिकत्वात्

२.प्रतिज्ञान्तरम् -- अनित्यः शब्दः ऐन्द्रियिकत्वात् इति।

३. प्रतिज्ञाविरोधः -- गुणव्यतिरिक्तं द्रव्यं रूपादिभ्योऽर्थान्तरस्य अनुपलब्धेः इति।

४. प्रतिज्ञासंन्यासः -- अनित्यः शब्दः कः एवमाह नित्यः शब्दः इति।

५. हेत्वान्तरम् --

६. अर्थान्तर-- शब्दः नित्यः कृतकत्वात्
७. निरर्थकम्-- नित्यः शब्दः, कचटतपानां गजडदबत्वात्
८. अविज्ञातार्थम् -- शब्दः नित्यः कृतकत्वात् (त्रिवारकथनम्)
९. अपार्थकम् -- दशदाडिमानि षडपूपा इति
१०. अप्राप्तकालम् -- स्वप्रतिपत्तिवत् परप्रतिपत्तिर्जनने परार्थानुमानक्रमस्यापगमात्
११. न्यूनम्-- प्रतिज्ञादीनां पञ्चानामपि साधनत्वात् साधनाभावे साध्यासिद्धेः।
१२. अधिकम् ---
१३. पुनरुक्तम्--- शब्दनित्यः, शब्दनित्यः इति।
एवं हरिभद्रसूरिमतानुसारेण न्यायमतस्य आलोचनं संक्षेपेण कृतम् इति।
१.८.१ बोधप्रश्नाः--
कृपया अधोलिखितानां प्रश्नानाम् उत्तराणि लिखतु।
१. न्यायमतानुसारेण कति पदार्थाः सन्ति?
२. हेत्वाभासाः कतिविधाः भवन्ति?
३. का नाम जातिः?
४. सिद्धान्तस्य भेद चतुष्टयं किम्?
५. दृष्टान्तवाक्यस्य स्वरूपं किम्?
१.९. आदर्शप्रश्नाः--
१. न्यायसूत्रं कः रचितवान्?
२. न्यायदर्शने जगतः निमित्तकारणं किम्?
३. ईश्वरस्य स्थितिसम्पादनाय के हेतवः सन्ति?
४. प्रत्यक्षस्य लक्षणं किम्?
५. प्रत्यक्षं कति विधं? किं च तत्?
६. न्यायमते ज्ञानोत्पत्तिकारः कः?
७. अनुमानस्य स्वरूपं किम्?
८. अनुमानं कतिविधम्?
९. के पञ्चावयवाः सन्ति?
१०. न्यायमते कति प्रमेयाः भवन्ति?
११. देहस्य लक्षणं किम्?
१२. न्यायदर्शने कति पदार्थाः सन्ति?
१३. को नाम दृष्टान्तः?
१४. के सिद्धान्त भेदाः भवन्ति?

१५. कतिहेत्वाभासाः?
१६. जातेः लक्षणं किम्?
१७. निग्रहस्थानानां संख्या का?
१८. न्यायमते कानि प्रमाणानि सन्ति?
१९. ज्ञानस्य अधिकरणं किम् अस्ति?
२०. कानि च्छलानि भवन्ति? तेषां नामानि लेख्यानि?

केचन पञ्च प्रश्नाः समाधेयाः

१. न्यायाभिमतस्य प्रमेयस्य स्वरूपं विवेचयत।
२. प्रत्यक्षस्य लक्षणं भेदं, उदाहरणं च वर्णयत।
३. न्यायमते ईश्वरसिद्धिं प्रति कारणानि निर्दिशत।
४. पञ्चावयान् आलोचयत।
५. त्रिविधमनुमानं सोदाहरणं लिखत।
६. शब्दप्रमाणम् आलोचयत।
७. हेत्वाभासाः के इति विचारयत।
८. सिद्धान्तस्य स्वरूपं भेदान् च विवेचयत।
९. छलं सोदाहरणं प्रस्तूयत।
१०. निग्रहस्य द्वाविंशति भेदान् लिखत।

कश्चन एकः प्रश्नः समाधेयः

१. हेत्वाभासस्य स्वरूपं सोदाहरणं विशदयत।
२. अनुमानप्रमाणं सम्यगालोचयत।
३. न्यायमते ईश्वरसिद्धिः कथम् इति विचारयत।
४. निग्रहस्थानस्वरूपं यथा ग्रन्थं विवेचयत।

# चतुर्थः भागः

संरचना


४.१.प्रस्तावना

४.२.उद्धेश्यम्

४.३.गुणस्वरूपम्

४.४.प्रकृतिः

४.५.पुरुषः

४.६.पाठसारः

४.७.आदर्शप्रश्नाः


तृतीयभागे भवन्तः न्यायदर्शनं पठितवन्तः। तत्र प्रमाण––प्रमेयपदार्थानां च चर्चां कृतवन्तः। सम्प्रति एतस्मिन् भागे सांख्यदर्शनम् आलोचयिष्यन्ति। भारतीयदर्शनप्रस्थानेषु सांख्यप्रस्थानं सर्वप्राचीनम् अस्ति। तस्य रचयिता महर्षिकपिलः अपि आदिविद्वान् अस्ति इति सर्वे शास्त्रकाराः स्वकीकुर्वन्ति। सांख्य सूत्रम् दर्शनस्य अस्य मूलाधारं भवति। विज्ञानभिक्षुणा विरचितं भाष्यं सांख्यमतस्य महत्त्वं प्रकटयति। ईश्वर कृष्णविरचिता सांख्यकारिका सांख्यमतप्रकाशकं भवति। वाचस्पति मिश्रविरचिता। तत्त्वकौमुदी सांख्यदर्शनस्य गारिमां वर्धयति। इदं हि सांख्यं ज्ञानपदवाच्यं भवति। अत्र पञ्चविंशति संख्यकानि तत्त्वानि भवन्ति। एतानि तत्त्वानि एव दर्शनस्य अस्य प्रमेयाः भवन्ति। इदं सांख्यमतम् द्विविधं भवति। एकं सेश्वरसांख्यमतम् अपरं निरीश्वरसांख्यमतम् इति। यस्मिन् मते ईश्वरतत्त्वम् अङ्गीकृतं तन्मतम् सेश्वरसांख्यमतम्। यस्मिन् मते ईश्वरतत्त्वं नाङ्गीकृतं तन्मतं निरीश्वर सांख्यमतम् इति। निरीश्वर सांख्याः अध्यात्मवादीनः भवन्ति। उभयमतानुसारेण तत्त्वानि पञ्चविंशति एव। एतेषां पञ्चविंशति तत्त्वानां सम्यग् विवेचनेन कैवल्यस्य प्राप्तिः भवति। कैवल्य निरूपणमेव दर्शनस्य अस्य मुख्यं प्रतिपाद्यं भवति। पञ्चविंशति तत्त्वज्ञः अवश्यं संसारबन्धात् मुच्यते इति अतः उक्तम्–––

**पञ्चविंशति तत्त्वज्ञाः यत्र तत्राऽऽश्रमे वसन्।**
**जटी मुण्डी शिश्वी वाऽपि मुच्यते नात्र संशयः।। इति।**

१.२.उद्धेश्यम्

सांख्यमतानुसारेण गुणत्रयं विवेचयिष्यन्ति।

प्रकृतितत्वम् आलोचयिष्यन्ति।

पुरुषस्वरूपं विचारयिष्यन्ति।

१.३.गुणाः सांख्यदर्शनस्य मूलाधारं यत् प्रकृति तत्त्वं तस्य स्वरूपं गुणत्रयसाम्यावस्था इति उक्तम् अस्ति। अत एव एतन्मते सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। प्रकृत्याः लक्षणं वर्णितम् अस्ति। एतन्मते गुणाः त्रयः

सन्ति। ते च सत्त्वगुण---रजोगुणः---तमो गुणा इति। निखिलं प्रपञ्चः त्रिगुणात्मको भवति। यस्मात् उपादानकारणं प्रकृतिः त्रिगुणात्मिका तस्मात् प्रपञ्चः त्रिगुणात्मकः। सत्त्वगुणस्य कार्यं भवति। रजोगुणस्य कार्यं तोषः सुखं, सन्तुष्ट प्रसाद वा भवति। तमोगुणस्य कार्यं दैन्यं भवति। एतदेव कथयति ग्रन्थकारः--

**सत्त्वं रज़स्तमश्चेति ज्ञेयं तावद गुणत्रयम्।**
**प्रसादतोषदैन्यादि कार्यलिङ्गं क्रमेण तत्।। इति।।**

सत्त्वगुणभूयिष्ठः जनः ज्ञानी प्रसन्नचितश्च भवति। यथा पुरुषोत्तमः रामभक्तः विभीषणः, रजोगुणभूयिष्ठः जनः मानी क्रियाशीलः च भवति यथा--रावणः तमोगुणभूयिष्ठः जवः अलसः, मन्दबुद्धिः च भवति। एतत् गुणत्रयं मिलित्वा सृष्टिरूपं महत्कार्यं सम्पादयति। यद्यपि एते परस्पर विरुद्धस्वभावकाः भवन्ति तथापि तैलदीपवर्त्तिकान्यायेन एते लक्ष्यं साधयन्ति। यथा दीपः तैलं, वर्त्तिका च परस्परं भिन्नस्वभावकाः भवन्ति यद्यपि तथापि मिलित्वा प्रकाशाख्यं कार्यं सम्पादयन्ति इमे।

प्रसादकार्यं सत्त्वगुणस्य यदुक्तं तत्र प्रसाद पदेन सौष्ठवं सुखं प्रसन्नता वा बोध्यते। शारीरमानस वाचिक सौष्ठवं सत्त्वगुणकारणात् सम्भवति। सात्त्विकः जनः ज्ञानातिशयवान् तु भवति एव, तेन सह मधुरं भाषते मधुरं व्यवहरति, शरीरेण मनसा च प्रसीदति। रजोगुणस्य तोषकार्यम् इति यदुक्तं तत्र तोष पदं सुखपरम्, सन्तोषपरं वा भवति। क्रियासम्पादनेन तोषः जायते, क्रियायाः फलमपि तोषकारणं भवति। मनसि शरीरे च स्फूर्ति जायते। तमोगुणस्य कार्यं दैन्यमिति दैन्यम् इति पदं दुःखपरं भवति। दुःखं च साख्यमते त्रिविधं भवति। आध्यात्मिकं दुःखम्, आधिभौतिकं दुःखम्, आधिदैविकं च दुःखम् इति। आध्यात्मिकं दुःखं द्विविधं भवति। शारीरिकं, मानसिकं च। ज्वरकाशादयः शारीरिकं दुःखं भवति। काम-क्रोध-लोभ-मोहदिकं मानसिकं दुःखं भवति। भूते विद्यमानानां मानव-पशु-मृगादीनां कारणतः आगतं दुःखम् आधिभौतिकं भवति। सर्पाघातः, व्याघ्रभक्षितः, दुर्जनेन हत इत्यादिकं एतस्य उदाहरणं अस्ति। दैवात् आगतं दुःखम् आधिदैविकम् इति। अशनिपातः गृहदाहः इत्यादिकं आधिदैविकसम्बद्धं दुःखं भवति।

१.४. बोधप्रश्नाः---

१. सांख्यमते कति गुणाः सन्ति?

२. गुणानां नामानि कानि?

३. सत्त्वगुणस्य कार्यं किम्?

४. त्रिविधं दुःखं किम्?

५. रजो गुणस्य उदाहरणं किम्?

१.५. प्रकृतिः--- सांख्यदर्शने द्वयं स्वतन्त्रतत्त्वं स्वीकृतम् अस्ति। तत्र एकं जडतत्त्वम्, अपरं चेतनतत्त्वम् इति। जडतत्त्वम् एव एतन्मते प्रकृतिः भवति। एतत् प्रकृतितत्त्वम् एव अन्येषां त्रयो विंशति तत्त्वानां जननी भवति। अतः एव एषा मूला प्रकृतिः इति, प्रधानम् इति, उपादानम् इति अव्यक्तम् इति च व्यपदिश्यमाना भवति। सांख्यतत्त्वानां चतुर्धावर्गीकरणं भवति।

१. प्रकृतिः ---जडतत्त्वम्

२. प्रकृति विकृतिः---- जडतत्त्वम्

३. विकृतिः--- जडतत्त्वम्

४. न प्रकृतिः न विकृत्तिः इति – चेतनतत्त्वम्

अत्र वयं जडतत्त्वेषु मुख्यं प्रकृतितत्त्वं विवेचयामः। सांख्याभिमता प्रकृतिः सत्त्व-रज-तमोगुणानां साम्यावस्थारूपा अस्ति। एषा प्रकृतिः सर्वस्यापि जगतः मूलं कारणम् अस्ति। एषा प्रकृतिः न कस्यापि कार्यं भवति। एषा सृष्टेः आदिमं कारणम् अस्ति, अतः एषा मूलाप्रकृतिर्भवति। निखिलमपि कार्यजातम् तस्याम् अव्यक्तरूपेण तिष्ठति अतः एतस्या नाम अव्यक्तं भवति। एषा प्रत्यक्षज्ञानगम्या न भवति अतः अनुमेया भवति। कार्यस्वरूपं दृष्ट्वा प्रकृत्याः अनुमानं भवति। एषा अविवेकीनि, नित्या च अस्ति। एषा सुखरूपा अस्ति, दुःखरूपा अस्ति, मोहरूपा च अस्ति। अतः त्रिगुणात्मिका भवति। एषा प्रकृतिः प्रसवधर्मीणि भवति। एषा स्वतन्त्रसत्तावती भवति। एषा स्वयं न बद्धा न वा मुक्ता भवति, किन्तु नानाश्रययुक्ता एषा संसरति, वन्धकारणं मोक्षकारणं च भवति। एतदेव उच्यते ग्रन्थकारेण---

**एतेषां या साम्यावस्था सा प्रकृतिः किलोच्यते।**
**प्रधानाव्यक्तशब्दाभ्यां वाच्यानित्यास्वरूपिका।। इति।**

एतस्मात् एव प्रकृतितत्त्वात् अन्यानि तत्त्वानि उत्पन्नानि भवन्ति।

तदुक्तम् ईश्वरकृष्णेन---

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।। इति।।**

अत्र पश्यामः इदानीम् अव्यक्तकार्याणि कानि सन्ति इति।

मूलप्रकृतिः -- सप्तः महत् – अहङ्कार, शब्दः, स्पर्शः, रूपः, रसः, गन्धः (पञ्चतन्मात्राणि --- षोडश विकृतितत्त्वानि। --- पञ्चज्ञानेन्द्रियाणि अ पञ्चकर्मेन्द्रियाणि अपञ्चतन्मात्राणि अमनःउ१६

चेतनतत्त्वम् एकम्उपुरुषः।।

चक्षुः, श्रोत्रम्, त्वक्, रसना, ध्राणम् इति एतानि पञ्चज्ञानेन्द्रियाणि भवन्ति। वाक्, पाणि, पाद, पायु, उपस्थम् इति एतानि पञ्चकर्मेन्द्रियाणि भवन्ति। शब्दस्पर्शरूपरसगन्धा इत्येतानि पञ्चतन्मात्रणि भवन्ति। मनः अन्तरिन्द्रियं भवति। एतेषां समूहस्य षोडशकगणः इति व्यवहारः।

एतेषु पञ्चतन्मात्राणि यानि सन्ति तेषां पञ्चतन्मात्राणां सकाशात् आकाशः, वायुः, तेजः, आपः, पृथिवी इत्येतानि पञ्चभूतानि उत्पन्नानि सन्ति। एतदेव उक्तं ग्रन्थकारेण--रूपात्तेजो रसादापो गन्धाद् भूमिः स्वरान्नभः।

स्पर्शाद्वायुस्तथैवं च पञ्चभ्यो भूतपञ्चकम् ।। इति।

१.६. बोधप्रश्नाः--

१. का प्रकृतिः?

२. षोशविकाराः के?

३. पञ्चभूतानि कानि?

४. ज्ञानेन्द्रियाणां नामानि कानि?

५. तेजभूतस्य उत्पत्तिः कस्मात् भवति?

१.७. पुरूषः -- सांख्यदर्शने पञ्चविंशतितत्त्वेषु अन्तिमं तत्त्वं भवति पुरुषतत्त्वम्। तत् एकमेव चेतनं तत्त्वं भवति। अयं पुरुषः नित्यः शुद्धः ज्ञानस्वरूपः मुक्तस्वभावकः च अस्ति। सत्त्वरजतमोगुणरहितः विगुणः अयं सर्वव्यापकः सूक्ष्मः च अस्ति। अतः कपिलदर्शने एवमुच्यते---

**अमूर्तश्चेतनो भोगी नित्यः सर्वगतोऽक्रियः।**
**अकर्ता निर्गुणः सूक्ष्म आत्माकापिलदर्शने।। इति।**

पुरुषः यद्यपि स्वरूपतः असङ्गः तथापि बुद्ध्याद्युपाधियुक्तः सः सङ्गी भवति, एकोऽपि अनेको भवति, मुक्तोऽपि बद्धो भवति, सर्वव्यापकोऽपि सीमितो भवति, सुखी भवति, दुःखी भवति, असंसारी अपि संसारी भवति, अकर्ता अपि कर्ता भवति। पुरुषस्य एष सर्वोऽपि व्यवहारः बुद्धिकारणतः मनकारणतः वा भवति इति सांख्यदर्शने वर्णितमस्ति। उक्तं च ग्रन्थकारेण--

**बुद्धिदर्पण संक्रान्तमर्थविप्रतिबिम्बकम्।**
**द्वितीयदर्पणकल्पं पुरुषे ह्यधिरोहति।। इति।**

पुनरपि उक्तं--

**पुरुषोऽविकृदात्मैव स्वनिर्भासमचेतनम्।**
**मनः करोति सान्निध्यादुपाधेः स्फटिको यथा।। इति।**

१.८. बोधप्रश्नाः--

१. पुरुषतत्त्वं कत्तमं तत्त्वं भवति?

२. पुरुषस्य कर्तृत्वभोक्तृत्वादिकं किं निमित्तम्?

३. कपिलदर्शने आत्मा कीदृशो भवति?

१.९. सांख्यमतसारः–

सांख्यदर्शने पञ्चविंशति तत्त्वानि भवन्ति। चतुर्विंशति तत्त्वानि जड़तत्त्वानि सन्ति एकमेव पुरुषतत्त्वं चेतनतत्त्वं भवति। चेतनतत्त्वम् आश्रित्य जड़तत्त्वानि स्वकार्याणि सम्पादयन्ति। प्रमेयाणां निरूपणार्थं साख्यदर्शने प्रत्यक्षम् अनुमानम् शब्द इति एतानि त्रिणी प्रमाणानि स्वीकृतानि सन्ति। प्रकृतिपुरुषयोः संयोगात् सृष्टिर्भवति इति एतन्मते प्रतिपादितम्। प्रकृतिपुरुषयोः संयोगः पङ्गवन्धन्यायेन भवति। यथा पङ्गुः अन्धः च परस्परं सहायेन लक्ष्यं प्राप्नुतः तथैव जड–चेतनयोः प्रकृति पुरुषयोः संयोगेन सृष्टिकार्यं भवति इति। एतस्मिन् सन्दर्भे ग्रन्थकारः एवं कथयति–– प्रधान नरयोश्चात्र वृत्तिः पङ्गवन्धयोरिव।। इति। प्रकृति पुरुषयोः वियोगात् मोक्षः सम्भवन्ति। पञ्चविंशति तत्त्वानां यदा सम्यग्ज्ञानं भवति तदा प्रकृतिपुरुषयोः विवेकख्यातिः जायते। विवेकख्याति द्वारा पुरुषः स्व स्वरूपे अधिष्ठितो भवति। इति।

१.१०. बोधप्रश्नाः––

१. जड़तत्त्वे कानि तत्त्वानि अन्तर्भवन्ति?

२. सांख्यदर्शने कानि प्रमाणानि सन्ति?

३. सृष्टिः कथं भवति?

४. कदा मोक्षः सम्भवति?

५. प्रकृतिपुरुषयोः संयोगः कथमिव भवति?

१.११. आदर्शप्रश्नाः

१. सांख्यदर्शनस्य प्रणेता कः?
२. सांख्यस्य भेदद्वयं किम्?
३. निरीश्वरमतम् इत्यनेन कस्य बोधः?
४. केवलविकृति तत्त्वानि कानि?
५. पञ्चतन्मात्राणि कानि?
६. पञ्चज्ञानेन्द्रियाणि कानि?
७. वाचस्पतिमिश्रः किं पुस्तकं लिखितवान्?
८. सांख्यम् इति पदस्य अर्थः कः?
९. सांख्यमते कानि तत्त्वानि स्वीकृतानि?
१०. गुणाः के?

११. सत्त्वगुणस्य कार्यं किम्?
१२. का नाम प्रकृतिः?
१३. गुणत्रयं मिलित्वा कथमिवकार्यं कुर्वन्ति?
१४. प्रकृति विकृति तत्त्वानि कानि?
१५. सांख्यमते पुरुषतत्त्वं कीदृशम्?
१६. प्रकृतिः पुरुषस्य भोगार्थं कथमिव प्रवर्तते?
१७. पञ्चतन्मात्रेभ्यः केषामुत्पत्तिर्भवति?
१८. सांख्याभिमता सृष्टिः किं रूपा?
१९. मोक्षः कथं जायते?
२०. सांख्यदर्शने प्रमाणानि कानि?

केचन पञ्चप्रश्नाः समाधेयाः

१. पञ्चविंशतितत्त्वानां वर्णनं कुरुत।
२. प्रकृतितत्त्वस्य कार्याणि विवृणुत।
३. प्रमाणत्रयमालोचयत।
४. रजोगुणस्य स्वरूपम् उदाहरणं च लिखत।
५. पुरुषतत्त्वं किमर्थम् इति विशदयत।
६. पञ्चविंशति तत्त्वज्ञानेन किं मिलति इति विचारयत।
७. षोडशगणान् आलोचयत।
८. पञ्चज्ञानेन्द्रियाणां तेषां विषायाणां च वर्णनं कुरुत।

कश्चन एकः प्रश्नः समाधेयः

१. पुरुषस्वरूपं विवेचयत।
२. प्रकृतिस्वरूपं तत्कार्यं च विशदयत।
३. गुणत्रयस्य उपादेयतां वर्णयत । ४. प्रकृति पुरुषयो वियोगात् मोक्षः कथमिति आलोचयत।

# पञ्चमोभागः

संरचना

५.१.प्रस्तावना
५.२.उद्धेश्यम्
५.३. द्रव्यम्
५.४.जीवः
५.५.स्याद्वादः
५.६.ज्ञानमीमांसा
५.७.सम्बन्धः
५..८.मोक्षविचारः
५.९.आदर्शप्रश्नाः

१.२.उद्धेश्यम्

जैनमते द्रव्यस्वरूपं विचारयिष्यन्ति।
जीवः किं रूपः इति चिन्तयिष्यन्ति।
स्याद्वादम् आलोचयिष्यन्ति।
मोक्षतत्वं चिन्तयिष्यन्ति।
ज्ञानमीमांसायाः चिन्तनं करिष्यन्ति।

१.३.द्रव्यम्

एतस्मिन् दर्शने अस्तिकाय--अनस्तिकायादि भेदेन द्रव्याणाम् वर्णनम्, नित्यानित्य-अनन्तधर्मस्वभावकानां पदार्थाणां चिन्तनम्, कृतं दृश्यते। एतन्मते द्रव्यम् त्रिधर्मी भवति। तद्यथा नित्यताधर्मः, अनित्यताधर्मः, व्ययधर्मः इति। तदेवमुच्यते- उत्पादव्ययध्रौव्यसंयुक्तं सत् इति। द्रव्यं च गुणपर्यायधर्मयुक्तं भवति एतदेव गुणपर्यायवत्त द्रव्यम्। इति वाक्यांशेन सूचितं भवति। अस्तिकायः अनस्तिकायः इति पदद्वयम् अत्र पारिभाषिकं पदं भवति। अस्ति सत्तायुक्तं विस्तारधर्मयुक्तम् यत् तत् अस्तिकायः इति। यथा--शरीरम्। अस्तिकाय द्रव्यम् एतन्मते पञ्चप्रकारकं भवति। १. जीवः २. पुद्गलः ३. आकाशः, ४. धर्मः, ५.अधर्मः इति। एतानि अनन्तदेशव्यापकानि द्रव्याणि भवन्ति। एतेषु जीवम् एकं विहाय अन्यानि चत्वारि अजीवतत्त्वानि भवन्ति। अनस्तिकायप्रत्यम् एकं भवति। तच्च कालः इति उच्यते। कालः एकदेशव्याप्यो भवति। पञ्चास्तिकायद्रव्येषु जीवः प्रधानभूतं द्रव्यं भवति। जीवनामद्रव्यं मुख्यत। द्विविधं भवति तद्यथा--बद्धजीवः, मुक्तजीवः इति। बद्धजीवः पुनः द्विविधः अस्ति---

१. जङ्गमः २. स्थावरः इति। जङ्गमजीवः चतुस्प्रकारको भवति। पञ्चेन्द्रिययुक्तः, चतुरिन्द्रिययुक्तः,

त्रिरिन्द्रययुक्तः, द्विरिन्द्रिययुक्तः च। स्थावरजीवः एकविधः। स च एकेन्द्रिययुक्तो भवति। चतुर्विध अजीवद्रव्यमध्ये पुद्गलः नाम द्रव्यं द्विविधं भवति। तत्र एकप्रकारः अणुरूपः अपरः प्रकारः सङ्घातरूपः इति। इदं पुद्गलतत्त्वं भौतिकं तत्त्वं भवति इति जैनाः प्रतिपादयन्ति। एतस्मिन् चत्वारो गुणाः भवन्ति। अतः उक्तं तत्त्वार्थसूत्रे-- स्पर्शरसगन्धवर्णवन्तः पुद्गलाः इति। एतत् पुद्गलद्रव्यम् उपचय अपचयस्वभावकं भवति। जैनमते कर्मतत्त्वं पौद्गिलिकं भवति। कर्मतत्त्वं भौतिकं तत्त्वम् भवति, यथा पृथिवी-आप-तेज-वायु एतानि भौतिकतत्त्वानि भवन्ति तथैव कर्मतत्त्वम् इति जैनाः प्रतिपादयन्ति। एतदेव कर्म जीवस्य बन्धकारणं भवति। कर्म जीवेन सह संश्लिष्य संसारेजाले तं जीवं पातयति। आकाशं नाम द्रव्यं नित्यं अनन्तं च भवति। इदम् आकाशतत्त्वं लोकाकाशं, अलोकाकाशम् इति भेदेन द्विविधं भवति। यस्मिन् द्रव्याणां स्थिति भवति तत् लोकाकाशं भवति। यस्मिन् पुनः न किमपि द्रव्यं तिष्ठति लोकाकाशतः उपरि तिष्ठति। आकाशं न प्रत्यक्षप्रमाणगम्यं भवति, किन्तु द्रव्याणां स्थिति सिद्ध्यर्थम् आकाशस्य अनुमानं क्रियते।

धर्मः अधर्मः इति तत्त्वद्वयस्य परिकल्पनं जैनमते अत्यन्तं विलक्षणमेव। धर्माधर्मयोः अर्थं न पुण्यं पापं न वा शुभम्, अशुभम्, न वा गुणः पर्यायः किन्तु ते पुद्गल तथा जीवतत्त्वस्य स्थिति गतिसहायक द्रव्यरूपेण धर्माधर्मयोः कल्पना कृत। यथा जलं मत्स्यस्य गतिदानं प्रति सहायकं भवति तथैव धर्मः जीवस्य गति प्रदानाय सहायको भवति न तु स्वयं गतिः भवति। अनस्तिकायद्रव्यं कालः अस्ति। कालस्य सत्ता अनुमानप्रमाणगम्या अस्ति। विद्यमानता, परिणामशीलता अपरत्व, परत्वं, प्राचीनता, नवीनता, ज्येष्ठता, कनिष्ठतादि व्यवहारधर्माणां आधारेण कालस्य स्थिति निर्धारिता भवति। कालस्य भेदद्वयं भवति। एकः व्यवहारिकालः पारमार्थिककालः इति। घटी, दिनं सप्ताहः, मासः सम्बत्सरादिरूपेण जनैः व्यवहृतः कालः व्यावहारिककालः अस्ति। अर्थात् व्यवहारे उपयुज्यमानः कालः व्यवहारकालो भवति। व्यवहारकालः सन्दर्भानुसारेण, भिद्यते यथा वर्तमानकालः, भूतकालः, भविष्यत्कालः इति। अपरः पारमार्थिककालः इति। एष नित्य निरवयव अखण्डात्मकश्च भवति। त्रिषु कालेषु एतस्य स्थितिः निश्चिता भवति। एवं जैनमतानुसारेण द्रव्य भेदविचाराः सन्ति।

१.४. बोधप्रश्नाः--

१. जैनमते प्रमुख द्रव्यभेदद्वयस्य नाम किम्?

२. अस्तिका यद्रव्याणि कानि भवन्ति?

३. बद्धजीवः कति प्रकारको भवति?

४. धर्माधर्मयोः एतन्मते केन रूपेण परिकल्पनं कृतम्?

५. पारमार्थिककालस्य स्वरूपं कीदृशम्?

१.५. जीवस्वरूपम्––– जैनदर्शनानुसारेण जीवः चेतनं द्रव्यं भवति। चैतन्यलक्षणो जीवः इति जीवस्य परिभाषाम् एते कथयन्ति। प्रत्येकम् अपि जीवः स्वरूपेण अनन्तचतुष्टयम्पन्नो भवति। तच्च अनन्तचतुष्टयम् एवं प्रकारकम् अस्ति। १. अनन्तज्ञानस्वरूपः जीवः, २. अनन्तदर्शनस्वरूपः जीवः, ३. अनन्तसुखस्वरूपः जीवः, ४. अनन्तवीर्यस्वरूपो जीवः इति। एतेषां चतुर्णां गुणानां तारतम्यकारणेन जीवेषु भेदाः भवन्ति। अतः एव निखिलम् अपि संसारः नानाजीवसंपृक्तो भवति। कर्मफलैः सम्बन्धं प्राप्य जीवः बद्धो भवति। कर्मावरणस्य नाशात् परं चतुष्टयगुणयुक्तः एषः जीवः मुक्त इति कथ्यते। जीवेषु गुणभेदाः न सन्ति किन्तु केवलं मात्राभेदो भवति इति एतन्मते अङ्गीकृतम् अस्ति। जीवेषु अत्यन्तं निष्कृष्टम् एकेन्द्रियजीव अस्ति। सः भूतेषु अचेतनम् इव तिष्ठति, परन्तु तस्मिन् चैतन्यं सुप्तावस्थायां भवति। वृक्षलतादिषु वनस्पतिषु चैतन्यं तन्द्रिरुमावस्थायां तिष्ठति। मर्त्यलोके विद्यमानाः जीवाः गुणानां तारतम्येन परिलक्षिताः भवन्ति। कीटात् आरभ्यमनुष्यदेव पर्यन्तं गुणतारतम्यः परिलक्षितो भवति। मुक्तजीवः जीवेषु सर्वोत्तमो भवति। मुक्तः अनन्तज्ञानवान् अनन्त आनन्दयुक्तः अनन्तदर्शनवान् च भवति।

जैन मते जीवः ज्ञाता भवति, कर्त्ता भवति, भोक्ता भवति। ज्ञानं जीवस्य स्वरूपगुणो भवति। सर्वेषां कर्मणाम् स्वयम् अनुष्ठाता भवति जीवः, तस्मात् स कर्ता इति कथ्यते, स्वयं यस्मात् कर्ता तस्मात् कर्मफलस्य भोक्ता अपि स एव भवति। जीवः एतन्मते अरूपः यद्यपि तथापि स्वशरीराकारस्य रूपस्य च धारणं कर्तुं प्रभवति इति जीवः न विभुः नवा अणुरूपः किन्तु शरीरपरिणामिरूपः इति। गजस्यजीव गजपरिमितो भवति पिपलिकायाः जीवः पिपीलिकापरिमितो भवति एतदेव उक्तमस्ति–पिपीलिकापुदगलं प्राप्य पिपीलिका भवति। गजपुद्गलं प्राप्य गजो भवति। संसारी जीवस्य इन्द्रियाणि शरीरं, मनः च भवन्ति। एतानि लौकिकज्ञानोत्पन्नं प्रति सहायकानि साधनानि भवन्ति।जीवस्य यदा कर्मफलक्षयः आत्यन्तिकरूपेण भवति तदा स जीवः संसारात् मुक्तो भवति। एवं जीवस्य विषये जैनानाम् अभिमतम् अस्ति।

१.६. बोधप्रश्नाः

भवन्तः जीवस्य स्वरूपं ध्यानेन पठितवन्तः। कृपया अधो लिखितानां प्रश्नानाम् उत्तराणि लिखन्तु।

१.जीवस्य लक्षणं किम्?

२. जीवे अनन्तचतुष्टयं किम्?

३. जीवानां भेदे किं कारणम्?

४. जैनमते जीवः कीदृशो भवति?

१.७. जैनाभिमतः स्याद्वादः––

प्रिय छात्राः भवन्तः एतावत् पर्यन्तं द्रव्यविचारं, जीवविचारं च पठितवन्तः। इदानीं जैनमते स्याद्वादविचारं

पठिष्यन्ति। जैनमते स्याद्वादसिद्धान्तः अत्यन्तप्रधानभूतोऽस्ति। स्यात् पदस्य अत्र न सम्भावनम्, न वा संशयः किन्तु ज्ञानस्य सापेक्षम् इति। ज्ञानं सापेक्षम् आंशिकं च भवति, अतः सर्वाणि परामर्शवाक्यानि अपि सापेक्षाणि भवन्ति। जैनाः एतदर्थमेव परामर्शवाक्यस्य प्रयोगात् पूर्वं स्यात् इति पदं योजयन्ति स्यात् वस्तुतः सापेक्षसत्यस्य सूचकं भवति इति जैनाचार्याणां चिन्तनम्।

किं च अनेकधर्मयुक्ताः पदार्थाः भवन्ति। पदार्थानां साकल्येन ज्ञानं सिद्धपुरुषस्य कृते भवितुम् अर्हति। सामान्यानां कृते तु ज्ञानम् आंशिक रूपेण सम्भवति जैनमते ज्ञानं त्रिप्रकारकं भवति। तत्र प्रथमः १.दुर्णयज्ञानम्, २. नयज्ञानम्, ३. प्रमाणज्ञानम् इति। यस्मिन् ज्ञाने अन्यधर्माणां निषेधो भवति तच्च ज्ञानं पुनः दोषयुक्तं भवति तादृशं ज्ञानं दुर्णयज्ञानम् इति। धर्मनिषेधेन विना सद्वस्तुनः यत् आंशिकं ज्ञानं जायते तत् ज्ञानं नयज्ञानम् इति। ज्ञाताज्ञातसकलधर्मसङ्कलनविधया स्याद् इति पदद्वारा उपस्थापितं ज्ञानं प्रमाणज्ञानम् इति। एवं च प्रमाणज्ञानम् आधारीकृत्य प्रवृत्तोऽयं वादः स्याद्वादो भवति। जैनानां प्रमाणमीमांसायां स्याद्वादस्य प्रधानभूमिका भवति। सद्वस्तुनः ज्ञानं सप्तभिः प्रकारैः वाक्यैः उपस्थापितं भवति। एतदेव पदान्तरेण नयवादः इति कथ्यते। अनन्तधर्मयुक्ताः पदार्थ यस्मात् तस्मात् तेषां पदार्थानां निरूपणप्रकाशः अपि अनन्ताः भवन्ति। परन्तु वास्तविक दृष्ट्या द्रव्यार्थिकनयः, पर्यायार्थिकनयः नयस्य भेदद्वयं भवति। तत्र पुनः द्रव्यार्थिकनयः त्रिविधः, पर्यायार्थिक नयः
चतुर्विधः इति। एतद् मिलित्वा सप्तभवति। अतः सप्तभङ्गीनय इति एतस्य व्यवहारः।

प्रमाणविचारसन्दर्भे जैनाः सप्तविधानि परामर्शवाक्यानि कथयन्ति। तद्यथा--

१. स्यात् अस्ति

२. स्यात् नास्ति

३. स्यादस्ति च नास्ति च

४. स्यादवक्तव्यम्

५. स्यादस्ति च अवक्तव्यञ्च।

६. स्यान्नास्ति च अवक्तव्यं च।

७. स्यादस्ति च नास्ति च अवक्तव्यञ्च।

वस्तु सापेक्षम् इति प्रथमवाक्यस्यार्थः। वस्तु सापेक्षं न भवति इति द्वितीयवाक्यस्यार्थः। सापेक्षरूपेण वस्तु अस्ति नास्ति च इति तृतीयवाक्यस्यार्थः। वस्तु सापेक्षम् इति ववत्तुं न शक्यते इति चतुर्थवाक्यार्थः। वस्तु न सापेक्षम् निर्वक्तुम् अशक्यम् इति षष्ठवाक्यस्यार्थः। सापेक्षतया वस्तु अस्ति नास्ति अवक्तव्यं च इति सप्तमवाक्यस्यार्थः।

जैनमते एतादृशस्य विलक्षण वादस्य परिकल्पनं पदार्थानां स्वरूपावबोधनार्थम् अभवत्। अयं स्यादवादः यथार्थज्ञानस्य अनिर्वचनीयतां बोधयति। इति

१.८. बोधप्रश्नाः---

१. जैन मतानुसारेण स्यात् इति पदस्य अर्थः कः?

२. जैनमते परामर्शवाक्यानि कतिविधानि?

३. त्रिप्रकारकं ज्ञानं किम्?

४. स्यात् नास्ति इति वाक्यस्यार्थः कः?

५. स्याद्वादस्य प्रयोजनं किम्?

१.९. जैनाभिमतज्ञानविचारसन्दर्भम् आलोचयिष्यन्ति भवन्तः। जैनदर्शने ज्ञानं द्विविधं भवति। एकम् अपरोक्षज्ञानम् अपरं परोक्षज्ञानम् इति। एतन्मते अपरोक्ष परोक्षज्ञानभेदविचारः इतरदर्शनविचारात् विलक्षणो भवति। आत्मसापेक्षं ज्ञानम् उपरोक्षज्ञानम् अस्ति, इन्द्रियसापेक्षं ज्ञानं परोक्षम् इति व्यवस्था। यस्मिन् ज्ञाने आत्मा एव मुख्यकारणीभूतः तत् ज्ञानम् अपरोक्षं ज्ञानं भवति। यस्मिनज्ञाने इन्द्रियाणि प्रमुखकारणानि भवन्ति तत् परोक्षज्ञानम् इति। परोक्षज्ञानं द्विविधं भवति। मतिज्ञानम् श्रुतिज्ञानञ्च। आत्मना सह मनसः सम्बन्धद्वारा यत् ज्ञानं सम्भवति तत् मतिज्ञानम्। संज्ञा, स्मृतिः, चिन्ता, अभिनिबोध इत्यादिनी मतिज्ञानात् अभिन्नानि भवन्ति। मतिज्ञानस्य प्रवृत्तिः, अतीते, वर्तमाने, भविष्यति इति त्रिषु कालेषु विद्यमाने विद्यमाने वस्तुनि श्रुतिज्ञानस्य प्रवृत्तिः।श्रुतिज्ञाने शब्दस्य उल्लेखो भवति, मतिज्ञाने तु शब्दस्योलेखः न भवति। अपरोक्षं ज्ञानं प्रकारान्तरेण पुनः त्रिविधं भवति। तत्र आद्यम् अवधिज्ञानम् द्वितीयं मनः पर्यायज्ञानम्, तृतीयं केवलं ज्ञानम् इति। दूरस्थानां व्यवहितपदार्थानां यत् ज्ञानं तत् अवधिज्ञानम् अस्ति। एतद्ज्ञानम् अतीन्द्रियं भवति। दिक् कालादीनां ज्ञानम् अवधिज्ञानं भवति। अन्यव्यक्तीनां मनोभावानां विचाराणां वा यत् ज्ञानं तत् मनः पर्याय ज्ञानम् भवति। एतस्मिन् आत्मा स्वयं साधनैः विना ज्ञानम् अनुभवति।

आत्मनः सर्वज्ञत्वरूपस्य प्रकाशनं यस्मिन् ज्ञाने जायते। तत् केवलज्ञानम् इति। एतदेवज्ञानं सर्वोत्कृष्टं भवति। अतः एव आचार्य हेमचन्द्रः कथयति स्वरूपाविर्भावमुख्यं केवलम्। इति। शुद्धं सर्वज्ञताविषयकं ज्ञानं केवलज्ञानस्य अर्थः। प्रकारान्तरेण परोक्षज्ञानं पुनः पञ्चधा भवति। तद्यथा---स्मृति प्रत्यभिज्ञानम्, तर्कः अनुमानम्, आगम इति। जैनमते प्रत्यक्षम्, अनुमानं, शब्दः इति एतानि परोक्षज्ञाने अन्तर्गतानि भवन्ति। एतत् त्रितयम् इन्द्रियसापेक्षं, मनः सापेक्षं च भवति। एवं ज्ञानचर्चा जैनमतानुसारेण निरूपितम्।

१.१०. बोधप्रश्नाः--

१. ज्ञानं कतिविधं? किं च तत्?

२. कीदृशं ज्ञानं परोक्षं ज्ञानं भवति?

३. श्रुतिज्ञानस्य प्रकृत्तिः कुत्रः?

४. अपरोक्षं ज्ञानं कतिविधं किं च तत्?

५. परोक्षज्ञानस्य पञ्चप्रकाशः के?

१.११. जैनमतानुसारं जीवेन सह कर्म-सम्बन्धः विच्छेदः च पञ्चभिः अवस्थाभिः सम्भवति। जैनदर्शने तासाम् अवस्थानां पदार्थ इति संज्ञा प्रदत्ता अस्ति। ते च पदार्थाः एवं भूताः सन्ति आस्रवः, बन्धः, सम्बरः, निर्जरा, मोक्षः च। एतैः सह जीवाजीवयो पुण्यपापयोः च मिलमेन एतेषां पदार्थानां संख्या नव भवति। उपर्युक्तानि पदानि जैनपारिभाषिकानि भवन्ति। तत्र आस्रवः इति पदस्य अर्थः प्रवाहः इति, कर्मपुद्गलानां जीवं प्रति प्रवहनम् आस्रवो भवति। तदेवमुक्तम् आचार्येण- मनोवाक् कायानां जीवं प्रति क्रियायोगः आस्रवः इति।

स च आस्रवः द्विविधो भवति। तत्र आद्यं भावास्रवः, द्वितीयं द्रव्यास्रवः इति। जीवे कर्मणः उत्पत्यर्थं मानसिक-वाचिककायिकक्रियाः साधनानि भवन्ति। एतासां क्रियाणां सङ्कल्पः उपाय एव भावास्रवो भवति। जीवम्प्रति कर्मपुद्गलस्य प्रवाहः द्रव्यास्रवः इति। द्वितीयावस्था बन्धः इति। तत्र बन्धः नाम यदा जीवः कर्मपुद्गलान् आदत्ते तदा स बद्धो भवति। एतदेव बन्ध इति कथ्यते। तदुक्तम् आचार्येण सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलान् आदत्ते स बन्धः इति। बन्धं प्रति कर्म एव कारणं भवति। प्रथमस्य कर्मणः द्वितियं प्रति, द्वितीयस्य तृतीयं प्रति, तृतीयस्य चतुर्थं प्रति एवं प्रकारेण कर्म प्रवाह व्यवस्था जैनमते स्वीकृता अस्ति। तृतीयावस्था सम्बरः इति। आगन्तुककर्मणामवरोधः सम्बरः इति कथ्यते। कर्मप्रवाहमार्गस्य उन्मोचनम् आस्रवः तन्मार्गावरोधः सम्बरः इति अनयोः भेदः। दर्शन ज्ञान चरित्र साधनैः मलस्य परिष्करणं निर्जरा भवति। प्रक्षालिते मले जीवः स्वयप्रकाशस्वरूपं प्राप्नोति। अन्तिमावस्था मोक्षो भवति। यदा जीवः सहजतया सर्वज्ञस्वरूपेण प्रकाशितं भवति तदा जीवस्य सा अवस्था मोक्षावस्थ इति कथ्यते। एवञ्च साररूपेण एतत् वक्तुं पारयामः यत् कर्मसम्बन्धः बन्धः, कर्मसम्बन्धस्य विनाशः मोक्षः इति। तदुक्तमाचार्येण बद्धस्य कर्मणः शारे यस्तु सा निर्जरामता आत्यन्तिको वियोगस्तु देहादर्मोक्ष उच्यते।। इति।

१.१२

बोधप्रश्नाः--

१. जीवेन सह कर्मणः सम्बन्धः कतिभिः प्रकारैः भवति?

२. को नाम आस्रवः?

३. आस्रवस्य भेदद्वयं किम्?

४. सम्बरस्य स्वरूपं किम्?

५. मोक्षावस्था कदा सम्भवति?

१.१३.

प्रिय छात्राः भवन्तः इतः पूर्वं जीवस्य कर्मसम्बन्धे के प्रकाराः इति पठितवन्तः। इदानीं मोक्षसाधनानि जैनमते त्रिणी रत्नानि भवन्ति इति पठिष्यन्ति। तत्र सम्यग्ज्ञानम्, सम्यक् दर्शनम्, सम्यक् चरित्रम् इत्येतेषां स्वरूपं विचारयिष्यन्ति।

सम्यग्दर्शनज्ञान चरित्राणि मोक्ष मार्गः इति तत्त्वार्थसूत्रे आचार्येण कथितम् अस्ति। जैनचार्यैः ये सिद्धान्ताः प्रतिपादिताः तेषां सिद्धान्तानां विषये अनन्याश्रद्धा आवश्यकी भवति। अत्यन्तश्रद्धावान् यः भवति स एव कर्मबन्धनात् मुक्तो भवितुं पारयति। एतदेव जैनदर्शने सम्यग्दर्शनं भवति। अतः उक्तमाचार्येण--- तत्त्वार्थश्रद्धां सम्यग्दर्शनम् इति। द्वितीयं रत्नं भवति सम्यक् चरित्रम् इति। सम्यक् चरित्रम् इत्युक्ते जैनदर्शने प्रतिपादितानां तत्त्वानां सुष्ठु बोधः, ज्ञानं वा, पुनः तेषां याथातथ्येन आचरणं सम्यक् चरित्रम् इति। तृतीयं रत्नमस्ति सम्यक् ज्ञानम् इति। सम्यक् ज्ञानम् इत्युक्ते जैनाचार्यैः प्रतिपादितानां सिद्धान्तानां तत्त्वानां वा यथार्थरूपेण बोधः सम्यक् ज्ञानम् इति। श्रद्धया ज्ञानस्य चरित्रस्य च प्राप्तिर्भवति। चरित्रद्वारा कर्ममलस्य प्रक्षालनं भवति। एतत् त्रयं मिलित्वा साधकं मोक्षमार्गं प्रति प्रापयति।

सम्यक् चरित्रस्य पञ्च अङ्गानि भवन्ति। तदेव पञ्चव्रतम् इति पदेन वर्णितम् अस्ति। तानि व्रतानि यथा १. आहिंसाव्रतम्, २. सत्यव्रतम्, ३. अस्तेयव्रतम्, ४. ब्रह्मचर्यवर्तम् ५. अपरिग्रहव्रतम् इति। मनसा, वाचा, कर्मणा च कस्यापि अनिष्टाकरणम् अंहिंसा भवति। सर्वात्मना आचरणे सत्यतायाः अनुसरणम् सत्यम् अस्ति। यस्य कस्यापि अन्यस्य द्रव्येषु लालसा, वञ्चनं वा अकरणं अस्तेयं भवति।
मनसा, वाचा, कर्मणा नैष्ठिकचरित्रस्य धारणं ब्रह्मचर्यं भवति। भौतिकभोग्यवस्तुषु सर्वथा संग्रहे, विनियोगे वा विरक्तिभावः अपरिग्रह इति। एतदेव अत्यन्तनिष्ठया मुनिभिः परिपाल्यते। अतः तत् महाव्रतम् इति उच्यते। किञ्चित् उदारता पूर्वकं एतदेव यदा गृहस्थाः आचरन्ति तदा एतत् अणुव्रतम् इति उच्यते। एतेषां त्रयाणां रत्नानां सम्मिश्रणेन सम्यक् बोधेन मुमुक्षुः मोक्षं प्राप्नोति। एतदेव गुणस्थानं इति जैनाचार्याः प्रतिपादयन्ति। एवं जैनदर्शने रत्नत्रयं विवेचितम्।

१.१४. बोधप्रश्नाः----

१. त्रीणिरत्नानि कानि?

२. सम्यक् चरित्रम् इत्युक्ते किं?

३. सम्यग्ज्ञानम् इत्यस्यार्थः कः?

४. अस्तेयम् इति पदस्यार्थः कः?

१.१५. आदर्शप्रश्नाः

अधो निर्दिष्टानां प्रश्नानाम् उत्तराणि लिखतु।

१. जैनदर्शने आधारदेवः कः?

२. जैनदर्शनस्य मूलं किम्?

३. जैन प्रमेयाणां मूलं किम्?

४. द्रव्यस्य मुख्यभेदद्वयस्य नाम किम्?

५. जीवस्य स्वरूपं किम्? स च कति विधः?

६. जीवे अनन्तचतुष्टयं किम् अस्ति?

७. बद्धजीवः कति प्रकारको भवति?

८. जैनमते धर्माधर्मयोः परिकल्पनं केन अभिप्रायेण?

९. ज्ञानं कति विधं किं च तत्?

१०. स्याद्वाद- इत्युक्ते किम्? तस्य उद्देश्यं किम्?

११. स्याद्वादः कति प्रकारकः?

१२. जैनमते परामर्शवाक्यानि कतिविधानि सन्ति?

१३. किं नाम परोक्षं ज्ञानम्?

१४. परोक्षज्ञानं कति विधम्?

१५. आस्रवस्य लक्षणं किम्?

१६. जीवस्य कर्मसम्बन्धसन्दर्भे काः अवस्थाः?

१७. सत्यस्य स्वरूपं किम्?

१८. ब्रह्मचर्यस्य लक्षणं किम्?

१९. सम्यग्ज्ञानम् इति पदेन कस्य बोधः?

२०. अस्तेयम् इत्युक्ते किम्?

१. जैनमतस्य प्रतिष्ठापकाचार्यस्य चरित्रं वर्णयत।

२. अनस्तिकायद्रव्याणां स्वरूपं वर्णयत।

३. द्रव्यभेदान् विशदयत

४. पुद्गलस्य स्वरूपं कार्यं च विवेचयत।

५. जीवः कः तस्य भेदद्वयं किम् इति विचारयत।

६. स्याद्वादस्य स्वरूपम् आलोचयत।

७. परोक्षज्ञानं विवेचयत।

८. सम्यक् चरित्रमालोचयत। पञ्चव्रतानि विवेचयत।

कश्चन एकः प्रश्नः समाधेयः

१. जैनदर्शनस्य परिचयं स्वभाषया लिखत

२. ज्ञानस्वरूपं पदभेदं च विशदं वर्णयत।

३. त्रीणिरत्नानि कथं मोक्ष साधनानि इति सप्रसङ्गम् आलोचयत।

# षष्ठोभागः

संरचना

६.१.प्रस्तावना
६.२.उद्धेश्यम्
६.३.द्रव्यम्
६.४.गुणः
६.५.कर्म
६.६.सामान्यम्
६.७.विशेष समवायौ
६.८.प्रमाणम्

कणादमतम्

१.१ प्रस्तावना---- प्रिय छात्राः इतं पूर्वं भवन्तः जैनमतम् आलोचितवन्तः। इदानीं हरिभद्रसूरिकृत षड्दर्शनसमुच्चयग्रन्थे कणादमतम् आलोचयिष्यन्ति। महर्षिकणादः एतस्य दर्शनस्य प्रणेता भवति। सः वैशेषिकं सूत्रम् इति पुस्तकम् अलिखत्। तदेव पुस्तकम् एतस्य दर्शनस्य मूलं भवति। महर्षिकणादः षड् भावपदार्थान् निरूपितवान्। एकम् अभावपदार्थम् अपि विचारितवान्। षड्दर्शन समुच्चयग्रन्थे ग्रन्थकारः षड् पदार्थानां विचारं कृतवान्। ते च पदार्थाः एवं रूपाः सन्ति--

**द्रव्यं गुणस्तथा कर्म सामान्यं च चतुर्थकम्।**
**विशेषसमवायौ च तत्त्वं षट्कं हि तन्मते।। इति।**

१.२. उद्देश्यम--

१. एतस्मिन् पाठे भवन्तः षट् पदार्थान् आलोचयिष्यन्ति।

२. कणादमते प्रमाणानां स्वरूपं विचारयिष्यन्ति।

३. कणादमते नवद्रव्याणां विचारं करिष्यन्ति।

१.३. द्रव्यम्---

महर्षिकणादः लोककल्याणकामनया वैशेषिकदर्शनं रचितवान्। तत्र विशेष नाम पदार्थं विशिष्य वर्णतवान् अतः तस्य दर्शनस्य नाम वैशेषिकम् अभवत्। एतस्मिन् मते द्रव्यम्, गुणः, कर्म, सामान्यम्, विशेषः, समवायः इति षट् पदार्थाः भवन्ति, द्रव्याणि नवविधानि सन्ति। गुणाः चतुर्विंशति प्रकारकाः सन्ति। कर्म पञ्चविधम् अस्ति। सामान्यं द्विविधं भवति। विशेषः अनन्तरूपो भवति। समवायः नित्यः एकश्च भवति। एतेषां पदार्थानां साधर्म्यवैधर्म्य ज्ञानात् अपवर्गस्य प्राप्तिः भवति। अपवर्गः एव दर्शनस्य अस्य मुख्यः प्रतिपाद्यं भवति। आगच्छन्तु

पदार्थानां क्रमे विद्यमानं द्रव्यम् आलोचयामः।

तत्र द्रव्यं षट्सु पदार्थेषु अन्यतमं भवति। यस्मिन् काचित् क्रिया, कश्चन गुणो वा तिष्ठति तत् द्रव्यं भवति। अतः शास्त्रकाराः कथयन्ति गुणाश्रयत्वं क्रियाश्रयत्वं वा द्रव्यम् इति। अर्थात् यः पदार्थः गुणस्य क्रियायाः वा उभययोः वा आश्रयो भवति सः द्रव्यं भवति। तच्च द्रव्यं नवविधम् अस्ति। तानि द्रव्याणि एवं भूतानि सन्ति----पृथिवी, आपः, तेजः, वायुः आकाशः, कालः, दिक्, आत्मा, मनः इति। एतेषु नवद्रव्येषु पञ्चमहाभूतानि एकस्मिन् गणे भवन्ति अन्यानि काल-दिक् इत्यादीनि अन्यस्मिन् गणे भवन्ति। पृथिवी आपः, तेजः, वायुः इति एतेषां भूतानां कारणं परमाणुः भवति। प्रत्येकस्य अपि भूतस्य परमाणवः अनेके भवन्ति। परमाणूनां परस्परसंयोगेन भूतानाम् उत्पत्तिः भवति। एतेषां चतुर्णां महाभूतानां रूपद्वयं भवति। एकं नित्यं रूपम्, अपरम्, अनित्यं रूपम् इति। अनित्यरूपम् एव कार्यरूपम् इति। भूतानां कार्यरूपं सावयवं भवति। एतेषु पञ्चमं भूतम् आकाश भूतं भवति। आकाशभूतं परमाणुरूपं न भवति। इदं व्यापकं नित्यं च भवति। एतेषां पञ्चमहाभूतानाम् एकैकः विशेषगुणो भवति। तद्यथा--

भूतानि विशेषगुणः सामन्यगुणः

१. पृथिवी---गन्धः-रसःरूपम्

२. आपः--रसः-रूपम्, स्पर्शः

३. तेजः---रूपम्-स्पर्शः

४. वायुः--स्पर्शः

५. आकाशः--शब्दः

एवं पञ्चमहाभूतानि स्वस्व गुणसंयुतानि तिष्ठन्ति। एतेषां विशेषगुणानां ग्रहणम् अपि भवति। येन गुणानां ग्रहणं भवति तत् इन्द्रियम् इति कथ्यते। प्रत्येकस्य अपि गुणस्य इन्द्रियाणि भिन्नानि भिन्नानि भवन्ति। तद्यथा--

गुणाः गुणग्राहकाणि इन्द्रियाणि

१. गन्धः---घ्राणेन्द्रियम्

२. रसः---रसनेन्द्रियम्

३. रूपम्--चक्षुरिन्द्रियम्

४. स्पर्शः--त्वगिन्द्रियम्

५. शब्दः---श्रोत्रेन्द्रियम् इति।

कालः, दिक् इति द्रव्यद्वयं आकाशवत् नित्यं विभुरूपं च भवति। स्वरूपतः नित्य द्रव्यम् अखण्डं यद्यपि तथापि व्यवहारम् अनुरुध्य एतानि सखण्डानि भवन्ति। यथा कालविषये--चिरकालः, अल्पकालः, वर्तमानकालः, भूतकालः, भविष्यत् काल इति व्यवहारो भवति। एवमेव दिशः विषये यथा--पूर्वदिक्, पश्चिमदिक्, उत्तरदिक्, दक्षिणदिक् इत्यादि। वैशेषिकमते आत्मा अनेकः नित्यः ज्ञानस्य आश्रयः च भवति मनः अन्तरिन्द्रियम् अस्ति। प्रत्येकस्मिन् आत्मनि एकैकं मनः संयुक्तं भवति मनसा संयुक्तम् आत्मा विषयानां

ग्रहणे समर्थो भवति।

१.४. बोध प्रश्नाः--

भवन्तः षड्पदार्थेषु आद्यं द्रव्यं नाम पदार्थं पठितवन्तः।

कृपया अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत।

१. आपभूतस्य विशेषः गुणः कः?

२. पञ्चमहाभूतानां नामानि कानि?

३. द्रव्यस्य लक्षणं किम्?

४. द्रव्याणां नामानि लिखत?

५. स्पर्शस्य ग्रहणं केन इन्द्रियेण भवति?

६. मनः एकम् अनेकं वा? मनः किं करोति?

१.५ गुणः--

षड् भावपदार्थेषु गुणः नाम पदार्थः अन्यतमः। वैशेषिकमते गुणः न स्वतन्त्रः पदार्थः। गुणः द्रव्यम् आश्रित्यतिष्ठति। गुणे गुणाः न भवन्ति, कर्म अपि न तिष्ठति। एषः गुणः चतुर्विंशति प्रकारकः। तत्र सूत्रकाराभिमतानां गुणानां संख्या सप्तदश भवति, भाष्यकारः आचार्य प्रशस्तपादः इतोऽपि सप्तगुणान् स्वीकृतवान् एतेगुणः भौतिकगुणाः मानसगुणाः च भवन्ति। एतेषु रूपम्, रसः, गन्धः, स्पर्शः, शब्दः, संयोगः, विभागः, बुद्धिः, सुखम्, दुःखम् इच्छा, द्वेषः, प्रयत्नः, संस्कारः च प्रमुखाः गुणाः भवन्ति।

तत्र रूपं नाम--चक्षुमात्रग्राह्यो गुणः इति। अर्थात् यस्यगुणस्य ग्रहणं चक्षुरिन्द्रियद्वारा भवति तत् रूपम् इति। रूपं तेजभूतस्य विशेषगुणः अस्ति।

रसनेन्द्रियमात्र ग्राह्यगुणः रसः इति। यस्य गुणस्य ग्रहणं जिह्वा द्वारा भवति तत् रसो भवति। रसः आपभूतस्य विशेषगुणो भवति। घ्राणेन्द्रियमात्रग्राह्यगुणः गन्धः इति। यस्य गुणस्य ग्रहणं नासिकाद्वारा भवति स गन्धः इति कथ्यते। गन्धः पृथिवीभूतस्य विशेषगुणः अस्ति। त्वगिन्द्रियमात्रग्राहय गुणः स्पर्शः। यस्य गुणस्य ग्रहणं त्वक् द्वारा भवति तत् स्पर्शः इति। स्पर्शः वायुभूतस्य विशेष गुणो भवती। श्रोत्रेन्द्रियमात्रग्राह्यगुणः शब्दः इति। यस्य गुणस्य ग्रहणं श्रोत्रद्वारा भवति तत् शब्दः अस्ति। शब्दः आकाशभूतस्य विशेषगुणः अस्ति। तत्र संयोगनाम क्रियाजन्यद्रव्याश्रयो गुणः। यस्य गुणस्य जननं क्रियाद्वारा भवति तत् च द्रव्यम् आश्रित्य तिष्ठति तत् संयोगः इति। संयुक्तहेतुः अपि संयोगः अस्ति। परस्परं पदार्थद्वयस्य विच्छेदहेतुः विभागो भवति।

परस्परासङ्कीर्णव्याप्यधर्मकथनम् विभागः इति। संयोगनाशहेतु अपि विभागो भवति। तत्र बुद्धिः नाम जानामीत्यनुव्यवसाय विषयगुणः इति। निश्चयात्मिकान्तःकरणम् अपि बुद्धि भवति। यदा विषयस्य निर्धारणं निश्चयो वा भवति सा बुद्धि। मानवः बुद्ध्या विषयान् जानाति कार्याणि सम्पादयति च। तत्र सुखं नाम अनुकुलवेदनीयम् इति। सर्वेषां कृते यत् अनुकुलम् इष्टं भवति तदेव तस्य कृते सुखाय भवति। इदं सुखं द्विविधं भवति। एकं लौकिकं सुखम् अपरम् अलौकिकं सुखम् इति। तत्र दुःखं नाम प्रतिकुलवेदनीयम् इति। यत् अन्येषां कृते अननुकुलं तत् दुःखम्। इदं च दुःखं त्रिविधं भवति १. आध्यात्मिकं दुःखम् २. आधिभौतिकं दुःखम् ३. आधिदैविकं चदुःखम् इति। तत्र इच्छा नाम सुखं मे स्यात्, इदं मे स्यात् इत्याशाविशेषः। लौकिकालौकिकविषयाणां कामनाविशेषः इच्छा इति कथ्यते। तत्र द्वेषः नाम परस्य अनिष्टाभिलाषा वृथानिन्दनं वा। तत्र प्रयत्नः नाम कार्यसाधनानुकुलचेष्टा विशेषः इति। तत्र संस्कार नाम स्मृतिजन्यं ज्ञानम्। एषः संस्कारः अनेकविधो भवति। एतेषु केचन आत्मगुणाः भवन्ति। यथा सुखदुःख इच्छा–द्वेष प्रयत्न संस्कारादयः। एवं वैशेषिकमतानुसारेण गुणसंक्षेपः विवेचितः

१.६. बोधप्रश्नाः––

१. गुणेषु किम् किम् न भवति?

२. गुणानां संख्या का?

३. संस्कारस्य लक्षणं किम्?

४. स्पर्शग्राहकम् इन्द्रियं किम्?

५. दुःखं कतिविधं? किं च तत्?

१.७. कर्म––भवन्तः इतः पूर्वं गुणविषये आलोचनं कृतवन्तः। इदानीं कर्मविषये विचारं करिष्यन्ति षड्पदार्थेषु अन्यतमः कर्म पदार्थः अस्ति। गुणवत् कर्म अपि एकः पदार्थो भवति। गुणापेक्षया एष पदार्थः भिन्न, अस्ति। वस्तुनां संयोग विभाग हेतुः कर्म भवति। एतदेव उच्यते शास्त्रकारैः –– संयोगभिन्नत्वे सति संयोगासमवायि कारणम् इति। कर्म मूर्तद्रव्यं भवति। इदं कर्म पञ्चप्रकारकम् अस्ति। तद्यथा––उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनं, प्रसारणं, गमनम् इति। तत्र उत्क्षेपणं नाम ऊर्ध्वदेशसंयोग हेतुः इति। उपरितनदेशे क्षेपणम् उत्क्षेपणम् इति। तत्र अपक्षेपणं नाम––अधः देशसंयोगहेतुः इति। आकुञ्चनं नाम प्रसृतस्य सङ्कलनम्, शरीरसन्निकृष्टदेशसंयोगानुकुलो व्यापारः प्रसारणम्। पूर्वदेश वियोग उत्तरदेश संयोगानुकुलो व्यापारः गमनम् इति। पूर्वदेशस्य त्यागः अन्यस्थानस्य च प्राप्तिः गमनं भवति।

१.८. बोधप्रश्नाः––

१. कर्माणि कानि सन्ति?

२. कर्माणि कानि सन्ति?

३. किं नाम गमनम्?

४. उत्क्षेपणम् इति पदस्यार्थः कः?

१.९. सामान्यम्--वैशेषिकमते अङ्गीकृतेषु पदार्थेषु सामान्यं नाम पदार्थः अन्यतमो भवति। सामान्यम् इति पदस्य समानधर्मः, जातिः वा इति अर्थः। यः धर्मः अनेकेषु द्रव्येषु, अनेकासु वा व्यक्तीषु निरन्तरं तिष्ठति सः समानधर्मः अथवा जातिः इति बोध्यते। एतदेव शास्त्रकारैः उक्तम् अस्ति-नित्यमनेकानुगतं सामान्यम् इति। यथा--संसारे अनेके मानवाः सन्ति। तेषु कश्चन एकः धर्मः मानवत्वम्। इति सर्वेषु मानवेषु तिष्ठति। एष एव सामान्यम् इति कथ्यते। मानवत्वम्, पशुत्वम्, घटत्वम्, इत्यादिनि सामान्यस्य उदाहरणानि भवन्ति। सामान्यस्य किमपि सीमाङ्कनं नास्ति। सामान्यं न कपोलकल्पितं किन्तु वास्तविकं तत्त्वं भवति। एतस्य सत्ता निश्चिता एव भवति। सामान्यकारणतः मानवस्य, पदार्थस्य वा जातेः परिचयो भवति। इदं सामान्यं द्विविधं भवति। तत्त प्रथमं परसामान्यम् द्वितीयम् अपरं सामान्यम् इति। सत्ता सामान्यं परसामान्यं भवति। सामान्यं स्वरूपतः यद्यपि एकम् विविध व्यक्तिम् आश्रित्य इदं यतः तिष्ठति तस्मात् अनेकं भवति। इदं नित्यं भवति। द्रव्येषु, गुणेषु, कर्मसु च इदं सामान्यं तिष्ठति। वैशेषिकमतानुसारेण वस्तुगतसत्तायाः सामान्यत्वे स्वीकरणम् अस्ति।

१.१०. बोधप्रश्नाः--

१. किं नाम सामान्यम्

२. सामान्यस्य उदाहरणद्वयं लिखत?

३. सामान्यम् इति पदस्य अर्थः कः?

४. सामान्यं कतिविधं? किं च तत्?

१.११ विशेषः- समवायः च--

वैशेषिकमते पदार्थानां क्रमे चतुर्थपदार्थः विशेषो भवति। समवायस्य पञ्चमक्रमो भवति। विशेष पदार्थस्य दर्शनेऽस्मिन् किञ्चिद् वैशिष्टयम् अस्ति। विशेष पदार्थमनुसृत्य वैशेषिकदर्शनस्य नामकरणम् अभवत्। तत्र

विशेषः नाम स्वतोव्यावर्तकः। नित्यद्रव्यवृत्तयो व्यावर्तको विशेषः, स च अनन्तः। अर्थात् यत् स्वयम् इतरेभ्यः भिन्नः एकम् अन्यस्मात् पृथक् करणे कारणं भवति, नित्यद्रव्येषु तस्य वृत्तिर्जायते तत् विशेष नाम पदार्थः इति।

नित्यद्रव्येषु भेदप्रदर्शनार्थं विशेषपदार्थस्य स्वीकरणं वैशेषिकदर्शने कृतम्। पृथिवी--जल-तेज-वायु भूतानां परमाणुषु परस्परं भेदं तद्गतगुणाधारेण भवति। परन्तु पृथिव्याः एकः परमाणु अन्यपरमाणुतः कथं भिन्नः जलस्य, तेजसः, वायोः च परमाणवः कथं परस्परं भिन्नाः भवन्ति? एकस्य आत्मनः अन्य आत्मतः भेदः, एकस्य मनसः अन्यमन अपेक्षया कथं भिन्नम् इति तथ्यं प्रकाशयितुं वैशेषिकदर्शने विशेषः विशिष्य स्वीकृतः। नित्य स्वभावकस्य विशेषस्य कारणतः परमाणुः, आत्मा, मनः, कालः, आकाशम्, दिक् इत्याद्याः नित्यपदार्थाः इतरेभ्यः द्रव्येभ्यः भिन्नाः भवन्ति। एतदेव विशेषस्य मुख्यं कार्यम्। अयं विशेषः नित्यद्रव्येषु तिष्ठति। यस्मात् नित्यद्रव्याणि अनेकानि भवन्ति तस्मात् तद्गतविशेषाः अपि अनन्ताः इति। एवञ्च नित्यद्रव्ये विद्यमानः कश्चन विलक्षण व्यावर्तकधर्मः विशेषो भवति इति वक्तुं शक्यते।

वैशेषिकमते समवायस्य अपि प्राधान्यम् अस्ति। समवायः कश्चन अपृथक् भूतः सम्बन्धो भवति। एषः सम्बन्धः नित्यः अयुतसिद्धश्च अस्ति। एषः सम्बन्धः अयुत सिद्धवस्तुद्वयमाश्रित्य तिष्ठति। एषः सम्बन्ध एतेषु एव सम्भवति, तद्यथा--द्रव्यगुणयोर्मध्ये, अवयव-अवयविनोर्मध्ये, गुण-गुणिनोर्मध्ये,जातिव्यक्त्योर्मध्ये, विशेष-नित्यद्रव्ययोर्मध्ये इति। एतत् युगलपञ्चकम् अयुतसिद्धम् इति उच्यते। समवायस्य सन्दर्भे आचार्यप्रशस्तपादः कथयति--अयुतसिद्धानामाधार्याधारभूतानां य सम्बन्धः इह, प्रत्ययहेतुः स समवायः इति।

एतदेव उच्यते हरिभद्रसूरिणा--

य इहायुत सिद्धानामाधाराधेयभूतभावानाम्।<br>
सम्बन्ध इह प्रत्ययहेकः प्रोक्तः स समवायः।। इति।

एवं कणादमते षड् पदार्थाः अत्र यथामति विवेचिताः।

१.१२. बोधप्रश्नाः--

कृपया अधोलिखितानां प्रश्नानाम् उत्तराणि लिखन्तु।

१. विशेषस्य लक्षणं किम्?

२. विशेषस्य कार्यं किम्?

३. विशेषः कुत्र तिष्टति?

४. समवायः इत्युक्ते किम्?

५. समवायस्य वृत्तिः केषु पञ्चयुगलेषु सम्भवति?

१.१३ प्रमाणम्

कणादमते प्रमेयसिद्धयर्थं प्रमाणद्वयम् अङ्गीकृतम्। तत्र आद्यं प्रत्यक्षं प्रमाणम्, द्वितीयम् अनुमान प्रमाणम् इति। एतेषां प्रमाणमीमांसा नैयायिकसम्मता प्रमाणविचाराः एव। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् इति प्रत्यक्षस्य लक्षणं भवति। प्रत्येकस्य विषयस्य प्रत्यक्षज्ञानम् प्रति षड्विधसन्निकर्षाः कारणानि भवन्ति। सन्निकर्षः लौकिको भवति अलौकिक अपि भवति। प्रत्यक्षम् अपि सविकल्पकं निर्विकल्पकम् इति भेदेन द्विविधम्, अस्ति। विशेषयुक्तानां पदार्थानां प्रत्यक्षं सविकल्पकं भवति। निर्विशेषपदार्थनां प्रत्यक्षं निर्विकल्पकं प्रत्यक्षम् इति।

लिङ्गलिङ्गिज्ञानम् अनुमानम् इति। तदेवम् उक्तं परामर्शजन्यज्ञानम् अनुमितिः इति। अनुमानज्ञाने पक्षे हेतोः साध्यस्य सामानाधिकरण्यं भवति। हेतु द्वारा पक्षे साध्यस्य सिद्धिः येन भवति तत् अनुमानम् इति। यथा धूम नाम हेतुना पर्वत नाम पक्षे वह्नि नाम साध्य विषयकं ज्ञानम्, एतदेव उच्यते पर्वतो वह्निमान् धूमात् इति। इदमनुमानं स्वार्थ परार्थभेदेन द्विविधं भवति। स्वस्य कृते यदा पर्वतवह्निविषयकं ज्ञानं भवति तदा तत् स्वार्थमनुमानम्। पञ्चावयव वाक्यप्रयोगद्वारा यत्र पर्वतवह्नि विषयकज्ञानस्य उपस्थापनं भवति तदा तत् परार्थानुमानं भवति।

प्रतिज्ञा, हेतुः, उदाहरणम्, उपनयः, निगमनम् इति पञ्चावयस्य नामानि भवन्ति। पर्वतो बहिनमान् इति प्रतिज्ञानाम अवयव वाक्यस्य स्वरूपम् अस्ति। धूमात् इति हेतुनाम अवयववाक्यस्य स्वरूपं भवति। यो यो धूमवान् स वह्निमान् नाम अवयव यथा महानसः इति। उदाहरण नाम अवयववाक्यस्य स्वरूपं भवति। तथा च अयं पर्वतः इति उपनय नाम अवयवस्य स्वरूपं भवति। तस्मात् अयं पर्वतः वहिनमान् इति निगमनं नाम अवयववाक्यस्य स्वरूपं भवति। प्रतिज्ञावाक्ये साध्यस्य निर्देशः अस्ति हेतुवाक्ये साधनस्य निर्देशो भवति, उदाहरणवाक्ये हेतु साध्ययोर्मध्ये विद्यमानस्य सम्बन्धस्य निर्देशो भवति। उपनयवाक्ये व्याप्ति विशिष्टपक्षधर्मता ज्ञानस्य उल्लेखो भवति। निगमवाक्यं प्रतिज्ञातस्य विषयस्य निश्चयो भवति। एवं कणादमते प्रत्यक्षस्य अनुमानस्य प्रमाणस्य च विचारः यथामतिः प्रस्तुतः।

१.१४. बोध प्रश्नाः---

१. कणादमते कति प्रमाणानि भवन्ति?

२. प्रत्यक्षस्य सन्दर्भे कति विधः सन्निकर्षः अस्ति?

३. प्रत्यक्षस्य भेदद्वयं किम्?

४. पञ्चावयवाक्यानि कानि?

५. उदाहरणवाक्ये कस्योल्लेखो भवति?

# सप्तमोभागः

संरचना

७.१.प्रस्तावना
७.२.उद्धेश्यम्
७.३.मतपरिचयः
७.४.प्रमाणम्
७.५.अनुमानम्
७.६.उपमानप्रमाणम्
७.७.शब्दप्रमाणम्
७.८.अर्थापत्तिः
७.९.अनुपलब्धिः
७.१०.आदर्शप्रश्नाः

(जैमिनिमतम्)

१.१. प्रस्तावना--

प्रिय छात्राः इतः पूर्वं भवन्तः कणादमतं पठितवन्तः। इदानीं धर्मस्वरूपप्रतिपादकं कर्ममार्गप्रदर्शकं मीमांसाशास्त्रं पठिष्यन्ति। मीमांसादर्शनस्य प्रणेता महर्षिः जैमिनिः अस्ति। अतः एतन्मतं जैमिनीयं मतम् इति नाम्ना ग्रन्थकारः प्रतिपादयति। आचार्यजैमिनिना कृतं मीमांसासूत्रं दर्शनस्य अस्य मूलाधारं भवति। परमपुरुषार्थं मोक्षः अत्र प्राधान्येन प्रतिपाद्यो भवति। प्रसङ्गात् कर्मस्वरूपं, धर्मस्वरूपम्, प्रमाणमीमांसा, तत्त्वमीमांसादिविषयाणां दार्शनिकदृष्ट्या चिन्तनं कृतं वर्तते। जैमिनिमतम् अनुसृत्य पक्षद्वयं दर्शने व्यवस्थितम् अस्ति। तत्र एकः पूर्वमीमांसा अर्थात् कर्ममीमांसा पक्षः, अपरः उत्तरमीमांसा अर्थात् ज्ञान विचार पक्षः उत्तरमीमंसावादिनः केवल ब्रह्मवादिनो भवन्ति, कर्ममीमांसकाः शब्दार्थवादिनः धर्मस्वरूप प्रतिष्ठायाम् आस्तां प्रकटयन्ति। इदानीम् एतस्मिन् भागे भवन्तः जैमिनीयं मतम् आलोचयिष्यन्ति।

१.२. उद्देश्यम्--

१. एतस्मिन् भागे जैमिनिमतस्य आरम्भे कारणं तद्भेदान् च आलोचयिष्यन्ति।
२. जैमिनिमतानुसारेण धर्मस्वरूपं चिन्तयिष्यन्ति।
३. प्रमाणानाम् आलोचने समर्थाः भविष्यन्ति।
४. प्रामाण्य विचारं करिष्यन्ति।

१.३. महर्षि जैमिनिः मीमांसादर्शनस्य आद्यः प्रवर्त्तकः अस्ति। तेन रचितं द्वादशाध्यायात्मकं मीमांसासूत्रम् एतन्मतस्य मूलं भवति। एतस्मिन् मते आचार्यजैमिनिः धर्मस्यस्वरूपम्, प्रमाणस्वरूपम्, प्रामाण्यविचारं च

कृतवान् अस्ति। एतन्मते कर्मस्वरूपस्य प्राधान्यं भवति। वेदवाक्यमत्र परमं प्रमाणं भवति। वैदिकविचारमाधारीकृत्य मीमांसामतं प्रतिष्ठितम् अस्ति। मीमांसा सूत्राणाम् उपरि शबरमुनिः भाष्यं लिखितवान्। अतः मीमांसाभाष्यं शाबरभाष्यम् इति नाम्ना प्रथितम् अस्ति। पूर्वमीमांसायां मतद्वयम् अस्ति। एकं गुरुमतम् अपरं भाट्टमतम् इति गुरुमतस्य प्रवर्तकः प्रभाकरमिश्रः अस्ति। भाट्टमतस्य प्रवर्तकः कुमारिलभट्टः अस्ति। अथतो धर्म जिज्ञासा इति सूत्रेण मीमासादर्शनस्य आरम्भं कृतवान् परमकारुणिकः आचार्यजैमिनिः। अलौकिकानाम् अदृष्टपदार्थानां याथातथ्येन निरुपणं अपौरुषेयवेदवाक्येभ्यः ज्ञापयितुं मीमांसामतस्य उद्भव इति। एतस्मिन् सन्दर्भे कथयति आचार्य हरिभद्रसूरिः--

**तस्मादतीन्द्रियार्थानां साक्षाद द्रष्टुरभावतः।**
**नित्येभ्यो वेदवाक्येभ्यो यथाऽर्थत्व विनिश्चयः।। इति।**

तत्र धर्मस्य जिज्ञासां प्रतिज्ञाय अनन्तरं कथयति आचार्यजैमिनिः--चोदनालक्षणार्थो धर्मः इति। चोदना इति पदस्यार्थः प्रेरकं वेदवचनम् इति। अर्थात् यत् वेदवचनम् उत्तमकर्मणि अस्मान् प्रेरयति तद् चोदना इति। यः धर्मम् इच्छति सः यजनादिक्रियां कुर्यात् एतदेव उक्तम् अस्ति वेदे--यजेत स्वर्गकामः इति अतः एव एतन्मते धर्मस्य विषये एवमुक्तम्--यागादिरेव धर्मः इति वेदविहितकर्मजन्यः धर्म इति। अत्र आचार्यहरिभद्रसूरिः कथयति--

नोदनालक्षणो धर्मो नोदना तु क्रियां प्रति।
प्रवर्तकं वचः प्राहुः स्वः कामोऽग्निं यजेद्यथा।। इति।

यथा--यजेत स्वर्गकामः इत्यादिकं वचनमत्र उदाहरणम् अस्ति। एवं धर्म विषये जैमिनिना सूचितम् अस्ति।

१.४. बोधप्रश्नाः---

१. जैमिनिना लिखितं सूत्रं कति अध्यायात्मकम्?

२. मीमांसादर्शनस्य आद्यः प्रवर्तकः आचार्यः कः?

३. जैमिनिमतानुसारेण धर्मस्य स्वरूपं किम्?

४. चोदनावाक्यस्य उदाहरणं किम्?

१.५. जैमिनिमतानुसारेण द्रव्य-गुण-कर्म-सामान्य-परतन्त्रता-शक्तिः---सादृश्य-संख्या इति एते पदार्थाः भवन्ति। एतेषां प्रमेयाणां सिद्ध्यर्थं षट् प्रमाणनि स्वीकृतानि सन्ति। एतदेव कथयति आचार्य हरिभद्रसूरिः--

**प्रत्यक्षमनुमानं च शब्दश्चोपमया सह।**
**अर्थापत्तिरभावश्च षट् प्रमाणानि जैमिनेः।। इति।**

अर्थात् प्रत्यक्षप्रमाणम्, अनुमान प्रमाणम्, उपमान प्रमाणम्, शब्दप्रमाणम्, अर्थापत्तिप्रमाणम्, अभावप्रमाणम्

इति। प्राभाकराः प्रमेयसिद्धयर्थं पञ्चप्रमाणानि स्वीकुर्वन्ति। भाट्टाः षट् प्रमाणानि अङ्गीकुर्वन्ति।

तत्र प्रत्यक्षं नाम साक्षात्प्रतीतिः। पदार्थैः सह अक्षाणाम् इन्द्रियाणां सम्प्रयोगः इति। एवं च इन्द्रियार्थ सन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् इति प्रत्यक्षस्य स्वरूपम्। एतस्मिन् प्रत्यक्षसन्दर्भे आत्म–मनसोः सम्बन्धः, मन–इन्द्रिययोः सम्बन्धः, इन्द्रियपदार्थयोः च एष त्रिविध सम्बन्धः स्वीकृतः। यस्य कस्यापि पदार्थस्य पदार्थ प्रत्यक्षं एतत्सन्निकर्षत्रयेण सम्भवति इति। इदं प्रत्यक्षं सविकल्पकं निर्विकल्पकम् इति भेदेन द्विविधं भवति। निर्विकल्पकं प्रत्यक्षम् आलोचनमात्रं भवति। तत्र ज्ञानम् अस्पष्टम् अस्फुटं च भवति। तदा पदार्थेषु सर्वेगुणाः यद्यपि तिष्ठन्ति तथापि तेषां परस्परं सम्बन्धः न भवति इति मीमांसकाः कथयन्ति। निर्विकल्पकप्रत्यक्षो प्रवृत्तिः भवति। बालकाः, पशवः, मन्दमतयश्च पुरुषाः निर्विकल्पक प्रत्यक्षद्वारा कर्मणि कदाचित् प्रवृत्ताः भवन्ति। सामान्यजनः अपि त्वरावशात् अन्यमनस्कता कारणतः वा निर्विकल्पक प्रत्यक्षद्वारा प्रवर्तते। सविकल्पकं प्रत्यक्षं तु पदार्थ तद्गत गुणानां च त्रिविधसन्निकर्षद्वारा भवति। यथा––अयं घटः, रक्तोऽयं घटः इत्याद्याकारकं ज्ञानम् इति।

१.४.१ अनुमानम्––

प्रमाणानां निरूपणक्रमे अनुमानं द्वितीयं प्रमाणं भवति। एतेषां मते अनुमानप्रमाणचर्चा न्यायमततुल्या भवति। तत्र अनुमानं नाम – लिङ्गपरामर्शजन्यं ज्ञानम् अनुमितिः अनुमितिकरणमनुमानम् इति। प्रथमज्ञानोदयात् परम् तज्ज्ञानकारणेन उत्पन्नम् अपरं ज्ञानम् अनुमानम् इति। अर्थात् प्रत्यक्षज्ञानम् अनुपश्चात् जायमानं ज्ञानम् इति। एतदेव शास्त्रीयपरिभाषया उच्यते अनुमानम्। तल्लिङ्गिलिङ्गपूर्वकम् इति। अत्र लिङ्गं उ अयं धूमःइति विषयकं ज्ञानम्। लिङ्गि उ वह्निविषयकं ज्ञानम्। एवञ्च धूम नाम लिङ्ग ज्ञानेन उ कारण ज्ञानेनउहेतु ज्ञानेन अयं पर्वतवह्निमान् नाम धूमरूप लिङ्ग ज्ञानेन वह्निविषयकलिङ्गज्ञानस्य निर्धारणम् अनुमानं भवति।अनुमानस्य स्वरूपम् एवं भवति। १.पर्वतो वह्निमान् २.धूमात् ३.यो यो धूमवान् स स वह्निमान् ४.यथा महानसः तथा च अयम् ५.तस्मात् तथेति। एवं पञ्च वाक्यानां समुदायः अनुमानं भवति। लिङ्गज्ञानं उ व्याप्तिज्ञानम् अनुमानं प्रति कारणं भवति। साध्यसाधनयोः नियमेन एकत्र उपलब्धिः व्याप्तिर्भवति। साध्यम् अत्र वह्निर्भवति,साधनम् कारणम् अत्र धूमो भवति।

अनुमानस्वरूपे पक्षः पर्वतो भवति साध्यस्थानम्। साध्यं वह्निर्भवति,साधनं धूमः हेतुर्भवति।व्याप्तिः साध्यसाधनयोः प्राप्तिस्थलं उदाहरणं भवति यथा महानसः इति। एवं प्रकारेण अनुमानस्य स्वरूपं भवति। एतदेव अनुमानं द्विविधं भवति। प्रथमस्य नाम स्वार्थ णनुमानम्।द्वितीयस्य नाम परार्थानुमानम् इति।स्वार्थानुमाने ज्ञाता स्वयं कर्ता भवति,परार्थानुमाने कर्ता अन्यो भवति। आत्मा यत् स्वयमनुमीयते तदनुमानम्।

मीमांसकमतानुसारेण अनुमाननिरूपणार्थं पञ्चावयववाक्यानाम् आवश्यकता न बवति। प्रतिज्ञ हेतु उदाहरण वाक्यैः अनुमानप्रणाणं सिद्धं भवति अथवा उदाहरण उपनय निगमनवाक्यैः अनुमानं सिद्धं भवति।

स्वावलोकनप्रश्नाः

१.किं नाम अनुमानम्

२.पञ्च अवयववाक्यानि कानि

३.मीमांसकाः कतिविधम् अवयववाक्यम् अङ्गीकुर्वन्ति
४.पक्षः इति पदेन कस्य पदार्थस्य बोधो भवति
५.अनुमानस्य मुख्यभेदद्वयं किम्

१.४.२.उपमानप्रमाणसन्दर्भे मीमांसकानां मतं नैयायिकमतमपेक्षया भिन्नं भवति।न्यायमतानुसारेण उपमानं प्रति संज्ञा–सञ्ज्ञि सम्बन्धज्ञानं कारणं भवति। अत्र दृष्टः गवयपदार्थस्य स्मृता गौः पदार्थेन सम्बन्धः सूचितो भवति। अनयोः गवय–गो पदार्थयोः सादृश्यं समानधर्मः यस्मिन् ज्ञाने भानं भवति तत् उपमानम् इति। उदाहरणम् अत्र गो सदृशं गवयः इति। उपमानजन्यं ज्ञानं सर्वं शाब्दिकं भवति। परन्तु मीमासकाः उपमानप्रमाणसन्दर्भे एवं कथयन्ति यत्– प्रसिद्धार्थस्य सादर्म्यादप्रसिद्धस्य भाजनम् इति।

अर्थात् प्रसिद्धार्थस्य दृष्टपदार्थस्य साधर्म्यज्ञानात् अप्रसिद्धस्य वस्तुनः साधनं यत् तत् उपमानम् इति। उपमानप्रमाणे स्मृत गौः विषयो भवति गवयसदृशी गौः अपि विषयो भवति। अतः मीमांसामतानुसारं पूर्वं दृष्टस्य इदानीं स्मृतस्य च गौः इति पदार्थस्य इदानीं दृष्टेन गवयवपदार्थेन सह यत् सादृश्यं ज्ञानं जायते तदुपमानम् इति। अत्र नीलोः प्रत्यक्षं ज्ञानं,गोः स्मरणज्ञानं भवति गोः नीलगवा सह सादृश्यं ज्ञानम् उपमानद्वारा सम्भवति। एवं च प्रथमं पूर्वदृष्टस्य स्मरणं ततः साक्षात् दृष्टस्य प्रत्यक्षज्ञानं तदनु तयोः सादृश्य ज्ञानम् इति उपमानप्रमाणे व्यवस्था। उपमाणप्रमाणं प्रत्यक्षतः भिन्नं स्मृतितः भिन्नं स्वतन्त्रमेव सादृश्यं ज्ञानम् इति।
स्वावलोकनप्रश्नाः
१.उपमानम् इति पदास्यार्थः कः
२.उपमानं प्रति न्यायमते किं कारणम्
३.उपमान प्रमाणे मीमांसकैः कीदृशी व्यवस्था स्वीकृता
शब्दप्रमाणम्– शब्दप्राणस्य अपरं नाम आगमप्रमाणम् इति। शब्दप्रमाणस्य भेदद्वयं अस्ति। प्रथमोभेदः पौरुषेयः द्वितीयः अपौरुषेयः इति । पौरुषेय नाम – आप्तपुरुषद्वारा उक्तं वचनम्। उदाहरणं यथा ग्रामे शतं जनाः सन्ति। वृक्षे पञ्च फलानि सन्ति इत्यादि अपौरुषेयः नाम –येन केनापि पुरुषेन न उक्तं वचनम् इति। सर्वानि वेदवचनानि अपौरुषेयाणि भवन्ति। तस्य उदाहरणं यथा – यजेत स्वर्गकामः पोरुषेयशब्दे भ्रमः दोषो वा कदाचित् सम्भवति। अपौरुषेय शब्दस्तु स्वतसिद्धः निर्दुष्टश्च भवति। मीमांसामतानुसारेण वेदः शब्दरूपः,नित्यः शब्दः नित्यः शब्दार्थः नित्यः शब्दार्थयोः सम्बन्धोपि नित्यो भवति इति मीमांसकाः निरूपितवन्तः। अपौरुषेयशब्दः द्विप्रकारको भवति। तद्यथा तत्र प्रथमप्रकारः विधिवादादारितः, द्वितीयप्रकारः अर्थवादाधारितो भवति। विधिवादप्राकरे कर्मानुष्टानस्य आदेशो भवति। अर्थवादप्रकारे वर्णना बवति. एषः प्रकारः कर्माणां सहायको भवति। अपौरुषेय शब्दानां प्रामाण्यं स्वतस्सिद्धो भवति। वेदानां प्रामाणिकतां दृढीकर्तुं मीमांसकैः आगमप्रमाणमङ्गीकृतम्।
स्वावलोकनप्रश्नाः
१.शब्दप्रमाणस्य अपरं नाम किम्

२.शब्दः कतिविधः

३.पौरुषेय शब्दस्य उदाहरणं किम्

४.सब्दार्थयोः सम्बन्धः कीदृशः

५.अपौरुषेय शब्दस्य प्रकारद्वयं लिखत

अर्थापत्तिः – प्रमाणानां निरूपणक्रमे अर्थापत्तेः पञ्चमं क्रमः अस्ति। तत्र उपपद्यज्ञानेन अदृष्टज्ञानस्य कल्पना अर्थापत्तिः उपपत्तिः अर्थापत्तिः इति। एतदेव ग्रन्थकारः वर्णयति–

दृष्टार्थानुपपत्या तु कस्याप्यर्थस्य कल्पना क्रियतेयद्बलेनासावर्थापत्तिरुदाहृता।। इति।।

दृष्टस्य अर्थस्य परिणामस्य उपपत्ति येन बलेन तर्केण प्रमाणेन वा भवति तत् अर्थापत्ति प्रमाणम् इति। एनमेव अर्थं वर्णयति शबरमुनिः–अर्थापत्तिरपि दृष्टः श्रुतो कार्योऽन्यथा नोपपद्यते इत्यर्थकल्पना।।इति । अर्थात् दृष्टस्य श्रुतस्य अर्तस्य वा उपपत्तिः येन अर्थेन विना न सम्भवति तादृशस्य ज्ञानसाधनस्य कल्पनम् अर्थापत्तिः इति। अत्र उदाहरणम् – पीनः देवदत्तः दिवा न भुङ्क्ते इति अस्य अयमर्थः यः स्थूलाकारस्वरूपवान् देवदत्तः नाम उरुषः दिवसे भोजनं न करोति इति। अत्र देवदत्तस्य पीनत्वं दृष्टं फलम्। एतस्य पीनत्वस्य प्राप्तये किमपि कारणं निश्चयेन भवेत्। परन्तु उदाहरणवाक्ये देवदत्तः दिवसे न खादति इति दिवा भोजनस्य निषेधः उक्तमस्ति। आहारेण विना शरीरस्य पुष्टिः न सम्भवति। अतः अवश्यं पीनत्वरूपं कार्यं प्रति ि◌शायां भोजनकल्पनं देवदत्तस्य कृते अवश्यं करणीयं भवति। अतः रात्रि भोजनस्य कल्पनम् अत्र अर्थापत्तिर्भवति। इदम् उदाहरणं दृष्टार्थापत्तेः भवति।

अन्यदुदाहरणं यथा– जीवन् देवदत्तः गेहे नास्ति इति अर्थात् देवदत्तः नाम पुरुषः इदानीं जीवति अस्ति परन्तु स गृहे नास्तीति। अस्मिन् वाक्ये – यदि देवदत्तः जीवति तर्हि स क्वचित् भवेत् एव। यदि वा तस्य स्थितिः गृहात् बहि अन्यत्र क्वचित् प्रदेशे कल्पनीयां भवति। अत्र गृहात् भिन्ने स्थाने देवदत्तस्य स्थितिकल्पनम् अर्थापत्तिः भवत्। एतादृशज्ञानस्य निर्णयः अर्थापत्तिप्रमाणेन विना न सम्भवति। एतदुदाहरणं श्रुतार्थपत्तेर्भवति।

ज्ञानविचारे आगतायाः असङ्गतेः दूरीकरणं विरोधाभासस्य वा निराकरणम् अर्थापत्तिप्रमाणस्य प्रयोजनं भवति। एतदुभयज्ञानप्रतिबन्धकस्य निराकरणम् अर्थापत्ति प्रमाणद्वारा सम्भवति। अतः अर्थापत्तिः शब्दप्रमाणा◌ीत् स्वतन्त्रं प्रमाणमस्ति।

स्वावलोकनप्रश्नाः

१.का नाम अर्थापत्तिः

२.अर्थापत्तेः भेदद्वयं किम्

३.दृष्टार्थपत्तेः उदाहरणं किम्

४.अर्थापत्ति प्रमाणस्य प्रयोजनं किम्

अनुपलब्धि प्रमाणम् –

षष्ठप्रमाणं भवति अनुपलब्धि प्रमाण् इति। अनुपलब्धिनाम अभाव इत्यर्थः। एतस्मिन् सन्दर्भे ग्रन्थकारः कथयति –

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।

वस्तु सत्ताऽवबोधार्थं तत्राभावप्रमाणता।। इति।

अर्थात् वस्तुस्वरूपस्य अवगमनार्थम् अभावप्रमाणस्य आवश्यकता अस्ति इति। मीमांसकतसम्प्रदाये मतद्वयम् अस्ति। एकं प्राभाकरमतम् अपरं भाट्टमतम् इति। प्राभाकराः अभावपदार्थम्, अभावप्रमाणं वा पृतक् तया न स्वीकुर्वन्ति। परन्तु भाट्टाः अर्थात् कुमारिलभट्टपादाः अभावप्रमाणं स्वतन्त्ररूपेण अङ्गीकृतवन्तः। प्रभाकरः अभावम् अधिकरणे अन्तर्भावयति परन्तु कुमारिलः अभावः अधिकरणमात्रं न भवति। इह भूतले घटनास्ति इति उदाहरणे – घटस्य प्रत्यक्षीकरणम् घटाभावस्य ज्ञानं च उभयं केवलभूतलप्रत्यक्षतः भिन्नः एव। अतः अभावः स्वतन्त्रं प्रमाणम् इति।

एवं च मीमांसकाः प्रमेयाणां निरूपणार्थं षट्प्रमाणानि निरूपितवन्तः प्रभाकरमते पञ्चप्रमाणानि भवन्ति। कुमारिलमते षट्प्रमाणानि सन्ति। धर्मः अत्र प्राधान्येन प्रतिपाद्यो भवति।

स्वावलोकनप्रश्नाः

१.प्रभाकरः अनुपलब्धिं कुत्र अन्तर्भावयति

२.कुमारिलमते अनुपलब्धिः कथं पृथक् प्रमाणम्

३.अनुपलब्धि इति पदस्य अर्थः कः

आदर्शप्रश्नाः

१.जैमिनिमहर्षि कस्य दर्शनस्य प्रणेता

२.जैमिनिमतस्य प्रथमं पुस्तकं किम्

३.मीमांसायां सम्प्रदायद्वयस्य नाम किम्

४.मीमांसादर्शनस्य मुख्यः प्रतिपाद्यः विषयः कः

५.धर्मस्य लक्षणं किम्

६.जैमिनिमते प्रमाणानि कानि

७.गुरुमतस्य प्रवर्तकः आचार्यः कः तन्मते प्रमाणानां संख्या का

८.भाट्टमते प्रमाणानि कति भवन्ति

९.अनुमानप्रमाणस्य लक्षणं किम्

१०.अर्थापत्तेः स्वरूपं किं

११.पञ्चावयव वाक्यानि कानि

१२.अर्थापत्तौ कस्य कल्पनं क्रियते

१३.उपमानस्य उदाहरणं किं
१४.अमुपलब्धि प्रमाणस्य अपरं नाम किं

१.धर्मस्य स्वरूपमालोचयत
२.प्रत्यक्षप्रमाणं विवेचयत
३.जैमिनिमतोक्तान् पदार्थान् वर्णयत
४.आगमप्रमाणस्य आवश्यकतां विवेचयत
५.उपमाणप्रमाणं विवेचयत
६.अनुमानभेदं निरूपयत
७.अनुपलब्धि प्रमाणस्य स्वरूपं विवृणुत

१.धर्मस्वरूपं सम्यगालोचयत
२.प्रमाणानि विवेचयत
३.जैमिनि मतसारम् उपस्थापयत

# अष्टमो भागः (चार्वाकमतम्)

संरचना

१.१.प्रस्तावना

१.२.उद्धेश्यम्

१.३.मतपरिचयः

१.४.चार्वाकसिद्धान्तः

१.५.पुरुषार्थः

१.६.तत्त्वानि

## १.१.प्रस्तावना

षड्दर्शनसमुच्चयग्रन्थे चार्वाकमतस्य वर्णनं कृतमस्ति। बौद्धमतादारभ्य जैमिनिमतपर्यन्तं षड्दर्सनानि भवन्ति। तथापि न्याय–वैशेषिकयोः एकत्वम् इति मत स्वीकृत्य षट् संख्यापूरणार्थं चार्वाकमतस्य आलोचनम् अत्र करणीयम् इति ग्रन्थकारः प्रतिज्ञां करोति। चार्वाकदर्शनम् अतीवलोकप्रियं दर्शनं भवति। एतस्मिन् दर्शने विचारिताः सर्वेऽपि विषयाः रमणीयाः भवन्ति। चार्वाकमतानुसारेण भूतानाम्,सृष्टितत्वानां, प्रमुखप्रमेयाणाम्, मोक्षतत्वानां च आलोचनं करिष्यामः। किमिदं चार्वाकदर्शनम् किं च अत्र प्रतिपाद्यं प्राधान्येन इति अत्र जिज्ञासा। आगच्छन्तु जिज्ञासायाः उपशमनं विचारेण करिष्यामः।

## १.२.उद्धेश्यम्

चार्वाकमतस्य स्वरूपं चिन्तयिष्यन्ति।

चार्वाकमतानुसारेण सृष्टिकरणम् आलोचयिष्यन्ति।

चार्वाकनये प्रमुखानां तत्त्वानां चिन्तनं करिष्यन्ति।

चार्वाकस्य प्रधानसिद्धान्तान् चिन्तयिष्यन्ति।

## १.३.मतपरिचयः

भारतीयदर्शनपरम्परायां चेतनवादस्य जडवादस्य च चिन्तनं कृतमस्ति। कानिचित् दर्शनानि चेतनवादम् आधारीकृत्य विकसितानि सन्ति। अन्यानि कानिचित् जडवादम् आधाराकृत्य विकसतानि सन्ति। तेषु जडतत्त्वप्रतिपादिकेषु दर्शनेषु चार्वाकदर्शनम् अन्यतमम् अति प्राचीनं च अस्ति। नास्तिकदर्शनेषु चार्वाकस्य एष भौतिकवादः सर्वप्राचीन एव। आचार्य बृहस्पति अस्य दर्शनस्य प्रवर्तकः अस्ति। आचार्यबृहस्पति विरचितानि कानिचित् सूत्राणि जयरासिभट्टद्वारा विरचितं तत्त्वोपालवसिंह नाम ग्रन्थः मतस्य अस्य मूलं भवति। एतस्य मतस्य अपरं नाम लोकायतमतं भवति। एतदेवमतं सर्वोत्कृष्टं सर्वजनविदितं सुप्रसिद्धम् एतत् एकमेव मतं भवति। एतस्मात् भिन्नं किमपि मतम् एव नास्ति इति एते कथयन्ति। इदं मतं लोके सहजतया स्वीकृतम् अवगतम् च अस्ति। अतः एतत् लोकयतां मतम् इति उच्यते।

एतस्मिन् मते चत्वारि भूतानि भवन्ति। तानि – पृथिवी,जलम्,अग्निः,वायु इति। इन्द्रियसुखं मानवस्य लक्ष्यं भवति। परलोकः इति लोक एव नास्ति। मरणम् एव मोक्षो भवति। आत्मा अत्र देह एव अर्थात् जडस्य विकाररूप एव अस्ति। कर्मकाण्डस्य निन्दनम् याग– श्राद्धादिकर्माणां निन्दनम् एतन्मते कृतम् अस्ति। चतुर्णां भूतानां परस्परसमूहतः देह– इन्द्रिय विषयाणां च उत्पत्तिः भवति।जडतत्त्वानां सम्मिश्रणेन चैतन्यस्य उत्पत्तिः भवति। कामः एकैव पुरुषार्थः। प्रत्यक्षम् एकमेव प्रमाणम् इति।

स्वावलोकनप्रश्नाः

१.चार्वाकमतस्य प्रवर्तकः कः

२.चार्वाकदर्शने कानि भूतानि सन्ति

३.चैतन्यं चार्वाकमते कथम् उत्पन्नं भवति

४.एतन्मते मानवस्य लक्ष्यं किम्

५.चार्वाकदर्शने कीदृशानां कर्मणां निन्दनं कृतम्

लोकायताः चार्वाकाः एवं वदन्ति यत्–

लोकायता वदन्त्येवं नास्ति देवो न निवृत्तिः।
धर्माधर्मो न विद्येत न फलं पुण्यपापयोः ।। इति

अर्थात् देवः ईश्वरः वा मानवं विहाय अन्यः नास्ति इति लोकायताः वदन्ति।निवृत्ति– नास्ति इति वदन्ति धर्मः नास्ति अधर्मः अपि नास्ति, न पुण्यम् अस्ति नापि पापम् अस्ति इति चार्वाकमतानुयायिनः कथयन्ति।

पुनश्च एते एवं कथयन्ति यत् मानवः स्व स्व इन्द्रियद्वारा यत् विषयी करोति अर्थात् ग्रहणं करोति तावन्मात्रमेव लोकः अस्ति। अस्माकं पञ्चज्ञानेन्द्रियाणि भवन्ति। तानि यथा – चक्षुरिन्द्रियम्, घ्राणेन्द्रियम्, रसनेन्द्रियम्, त्वगिन्द्रियम्, श्रोत्रेन्द्रियम् इति। चक्षुरिन्द्रिय द्वारा रूपस्य ग्रहणं भवति। घ्राणेन्द्रियद्वारा रसस्य ग्रहणं भवति।त्वगिन्द्रियद्वारा स्पर्शस्य ग्रहणं भवति। येषु येषु लोकेषु इन्द्रियाणां विषयरूपेण ये लोकाः सन्ति तावन्त एव लोकाः भवन्ति इति। अतः ग्रन्थकारः कथयति –

एतावानेव लोकोऽयं यावानिन्द्रियगोचरः।
भद्रे वृकपदं पश्य यद्वदन्ति बहुश्रुताः।। इति

यावत् दूरं इन्द्रियाणि लोकान्, लोकस्थितान् पदार्थान् द्रष्टुं गन्तुं ज्ञातुं वा प्रभवन्ति तावान् एव लोकः इति। अतः एते पृथिवीभूतम्,जलभूतम्,अग्निभूतम्,वायुभूतं च अङ्गीकृतवन्तः। पृथिवीभूतं घ्राणेन्द्रियस्य विषयो भवति। जलभूतं रसनेन्द्रियस्य विषयो भवति। वायुभूतं त्वगिन्द्रियस्य विषयो भवति। किञ्च प्रत्यक्षसिद्धं सर्वेऽपि पदार्थाः अत्र स्वीकरणीयाः सन्ति। ये पुनः अलौकिकाः अदृष्टाः इन्द्रियाद्यगोचराः विषयाः ते अत्र न स्वीकृताः सन्ति। अतः एव पुण्यम्,पापम्,धर्मः,अधर्मः,स्वर्गः,नरकादयः पदार्थाः चारवाकमते न स्वीकृताः सन्ति। यत् हि वस्तु अस्ति तत् सर्वं यदाकदापि इन्द्रियगोचरं भवति। स्वर्गनरकादयः,धर्माधर्मादयः,पुण्यपापादयः न कदापि न केनापि प्रत्यक्षीकृताः। अतः ते एतन्मते न सन्ति इति भावः।प्रत्यक्षं विहाय अन्यत् प्रमाणम् एव नास्ति। धर्माधर्मादि कल्पनं केवलं परवचनार्थम् इति।

स्वावलोकनप्रश्नाः
१.लोकायताः किं किं नास्ति इति वदन्ति
२.लोकस्य सीमाङ्कने चार्वाकैः कथं कृतम्
३.चक्षुरिन्द्रियस्य विषयः किं भूतं भवति
४.धर्माधर्मयोः कल्पनं किमर्थम्
१.७. पुरुषार्थाः –

धर्म –अर्थ–काम–मोक्ष इति चत्वार– पुरुषार्थाः भवन्ति। परन्तु वेदनिन्दकः बौतिकवादी चार्वाकः एकमेवपुरुषार्थं स्वीकरोति। स च काम एव। शरीरं भोगसाधनं भवति। यदा शरीरं सुस्थं यौवनावस्थापनं तदा तस्य सम्यक् उपयोगः भवेत्। यतो हि गते यौवने तस्य सुखं पुनः न प्रत्यागच्छति। अतः सुखानुभवार्थं रक्त–मांस– वीर्यपरिपूरितस्य शरीरस्य यथेष्टं भोगः करणीयः। मनः यदा यत् यत् कर्तुम् इच्छति तदा तदा तत् कर्म करणीयं भवेत्। तत्र कार्याकार्यविवेचनं न करणीयम्,पापपुण्यविचारः सुखानुभवविषये नैवचिन्तनीयम्। एतत् शरीरं तु उपभोगार्थम् एव अस्ति।यः यावत् अधिकां कामवासनां पूरयति तस्य जीवनं सफलं भवति। पुण्यपाप भयात् यः कामनासनां न पूरयति तस्य जीवनं व्यर्थं भवति। यदा यौवनमागतं भवति तदा तस्य सकामोपयोगः भवेत्। यः पापभीत्या यौवनस्य उपयोगं न करोति सः मूर्खो भवति। आहार–विहार–उपभोगादिषु विषयेषु कुण्ठा नप्रदर्शनीया। अस्माकं यत् शरीरं दृस्यते तत् चतुर्णां भूतानां मेलनम् एव मिश्रणात् उत्पन्नम् अस्ति। अतः ग्रन्थकारः कथयति –

पिब खाद च जातशोभने यदतीतं वरगात्रि तन्न ते।
न हि भीरु गतं निवर्तते समुदयमात्रमिदं कलेवरम्।।

मनः यथा इच्छति तथा आचरणीयम् इति,यावत् जीवं धारणीयं तावत् सुखेन समयः यापनीयः भवति। शरीरस्य नाशात् परं पुनः इदं शरीरं एतस्मिन् लोके न आगच्छति। अतः अनेनशरीरेण यावत् शक्यं भोगः करणीयः। कान्ताकामिनी–अङ्गना–आलिङ्गनमेव परमं सुखं भवति। चार्वाकाः इदमपि कथयन्ति यत्–

यावज्जीवं सुखं जीवेत् श्रुणं कृत्वा घृतं पिबेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः।। इति।

स्वावलोकनप्रश्नाः
१.पुरुषार्थाः कति
२.चार्वाकमते कः परमपुरुषार्थः
३.जीवने यथेष्टभोगः किमर्थं करणीयः
४.यावत् जीवं कथं जीवनं धारणीयम्
५.कस्य पुनरागमनं न भवति
१.८.तत्त्वानि –

पृथिवी–जलम्–अग्निः–वायुः–आकाश इति एतानि पञ्चभूतानि भवन्ति। परन्तु चार्वाकाः चत्वारिभूतानि

स्वीकुर्लन्ति। तेषां कथनमस्ति यत् आकाशं नाम भूतं कोऽपि न दृष्टवान् कस्यापि इन्द्रियस्य विषयः न भवति। यस्य कस्यापि प्रत्यक्षतः यदि सिद्धिः नास्ति तर्हि तस्य सत्ता नास्ति इति चार्वाकाः प्रतिपादयन्ति। एतानि पृथिवी–जल–अग्नि–वायुरिति चत्वारिभूतानि येन केनापि इन्द्रियेण गोचरी भवन्ति। एतानि स्वाभाविकरूपेण स्वयमेव उत्पन्नानि सन्ति। प्रत्यक्षम् एकमेव प्रमाणम्। एते अङ्गीकुर्वन्ति। एतानि चत्वारि भूतानि एव मिलित्वा चैतन्यमुत्पादयन्ति। एतस्मिन् स्नदर्भे ग्रन्थकारः एवं यथयति –

किं च पृथ्वी जलं तेजो वायुर्भूतचतुष्चयम्।
चैतन्यभूमिरेतेषां मानं त्वक्षजम् एव ।। इति

इदं भोग्यं शरीरम् एव आत्मा बवति। आकारसहितम् इदं शरीरं अत्र एव असमाकं सुखदुःखभोगसाधनरूपेण स्थित्वा अस्मान् सहकरोति। देहरूपी आत्मनः उत्पत्तिः एतेभ्यः चर्तुभ्यः जायते इति तदुक्तं ग्रन्थकारेण–

पृथिव्यादिभूतसंहत्यां तथा देहादि सम्भवः।
मदशक्तिः सुराङ्गेभ्यो यद्वत्तद्वत्स्थिता.त्मना।। इति

यथा विविधफलरसानां सम्मिश्रणेन ततः काचित् विलक्षणा मदिराशक्तिः उत्पद्यते तथैव चतुर्णां भूतानां परस्परं मिश्रणेन चैतन्यम् उपजायते। तादृशचैतन्य विशिष्टदेहः एव आत्मा भवति इति।

किं च चार्वाकाः प्रत्यक्षे स्द्धे विषये आदरं प्रकटयन्ति विश्वासं च कुर्वन्ति। एतदुक्तं ग्रन्थकारेण

तस्माद् दृष्टपरित्यागाददृष्टे च प्रवर्तनम्।
लोकस्य तद्विमूढत्वं चार्वाकाः प्रतिपेदिरे।। इति

सुखं यद्यपि दुःखमिश्रितं तथापि दुःखात् भीत्वा यदि कश्चित् प्रत्यक्षसिद्धं सुखं परित्यजति स तु मूर्ख एव भवति। पुनश्च अस्मिन् एव लोके प्रत्यक्षसिद्धं सुखं परित्यज्य पारलौकिकसुखस्य विषये श्रद्धां प्रदर्शयति स मूढः एव भवति। यतः स्वर्गलोक इति लोक एव नास्ति कुतो वा तत्सुखस्य कृते प्रयासः। कृतप्रयास सर्वोऽपि व्यर्थ एव भवति। अपि च मोक्षरूपं सुखं सामान्यतः न प्राप्तं भवति। तदपि ध्यान–जप–बहपकष्टसाध्यकर्मानुष्ठानेन कदाचित् लभ्येत। तत्र निश्चितता एव नास्ति। एवम् अनिश्चितफलस्य चिन्तनं मूर्खाः एव कुर्वन्ति। सर्वोहि लोके दृष्टे फले प्रयत्नं करोति। अदृष्टस्य सम्भावितस्य फलस्य सदा उपेक्षां करोति बुद्धिमान् इति चार्वाकानाम् आशयः।

अपि च अर्जितपुण्यपापद्वारा सम्पादितं स्वर्गादिकं नास्त्येव। एतत् सर्वं कपोलकल्पितम् अवास्तवं भवति। अतः प्रवृत्तिः निवृत्तिरूपो व्यापारः एतन्मते न अङ्गीक्रियते।

एवञ्च प्रत्यक्षमेकमेव प्रमाणम्। काम एकैव पुरुषार्थः, पृथिवी–जल–अग्नि–वायुरिति एतानि एव भूतानि। चैतन्यविशिष्टदेह एव आत्मा। अङ्गनाद्यलिङ्गनसुखमेव परमं सुखम्। लोकनियन्ता प्रसिद्धः राजा एव ईश्वरः। प्रत्यक्षतः उपलभ्यमानं सुखमेव वास्तवम्,स्वर्गलोकः स्वर्गसुखं वा सत्ताहीनम्। मरणमेव मेक्षः। धर्माधर्मौ,पुण्यापुण्यौ एतत् सर्वं अवास्तवं कपोलकल्पितं भवति। इति चार्वाकमतनिष्कर्षः।

स्वावलोकनप्रश्नाः

१.चार्वाकमते भूतानि कानि भवन्ति

२.कः आत्मा भवति
३.चार्वाकनये प्रमाणं कतिविधं किं च तत्
४.देहस्य उत्पत्तिः कथं भवति
५.ईश्वरपदवाच्यः कः
आदर्शप्रश्नाः (लघूत्तरीयाः)
१.चार्वाकमतस्य प्रथमः आचार्यः कः
२.चार्वाकमतस्य आधारं किम्
३.कः आत्मा भवति
४.भूतानि कानि सन्ति
५.जीवनं कथं धारणीयम् इति चार्वाकाः कथयन्ति
६.चार्वाकाः किं निन्दन्ति
७.चार्वाकनये किं प्रमाणं स्वीकृतम्
८.चार्वाकदर्शने मोक्षः कीदृशः
९.कः ईश्वरः
१०.चार्वाकनये कः परमपुरुषार्थः
११.चैतन्यस्य उत्पत्तिं प्रति किं कारणम्
१२.धर्माधर्मयोः विषये चार्वाकस्याशयः कीदृशः
१३.चार्वाकस्य मते कः मूढः
१४.स्वर्गलोक-स्वर्गसुखस्य विषये चार्वाकाः किं चिन्तयन्ति
१५.कीदृशं सुखं न परित्यक्तव्यम्
पञ्चाङ्कप्रश्नाः
१.चार्वाकमतानुसारेण प्रत्यक्षप्रमाणम् आलोचयत।
२.सृष्टितत्त्वानि कानि तत्र कारणं च किं
३.चैतन्यस्य उत्पत्तिप्रक्रियां वर्णयत।
४.आकाशभूतं किमर्थं न अङ्गीकुर्वन्ति चार्वाकाः
५.यावज्जीवं सुखं जीवेत् इत्यस्य भावं स्पष्टीकुरुत।
६.एतावानेव लोकोऽयम् इति कारिकांशस्य तात्पर्यं लिखत।
७.किं च पृथिवी जलं तेज इति कारिकांशस्य व्याख्या कार्या।
दशाङ्कप्रश्नाः
१.चार्वाकमतसारं स्वभाषया लिखत।
२.चार्वाकोक्तं सृष्टिप्रक्रियां विवेचयत।
३.चार्वाकाभिप्रेतानि तत्त्वानि आलोचयिष्यति।